Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# अथ सटीका अपरोक्षानुभूतिः प्रारभ्यते

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अ.उ. श्रीगणेशायनमः॥श्रीदक्षिणामूर्तयेनमः॥स्वप्रकाशश्चहेतुर्यः परमात्माचिदात्मकः॥अपरोक्षानुभूत्याख्यः सो टी.
१ हमस्मिपरंसुखं॥१॥ईशगुर्वात्मभेदाद्यः सकलव्यवहारभूः॥औपाधिकः स्वचिन्मात्रः सोपरोक्षानुभूतिकः॥२॥त
देवमनुसंधायनिर्विघ्नांस्वेष्टदेवतां॥अपरोक्षानुभूत्याख्यामाचार्योक्तिंप्रकाशये॥३॥यद्यपीयंस्वतःस्पष्टातथा
पिस्वात्मशुद्धये॥यत्नोयंसोपिसंक्षेपात्क्रियतेऽनर्थनाशनः॥४॥क्वाहमल्पकरः क्वायंसूर्यस्तेजोनिधिः किल
॥तथापिभक्तिमान्कः किंनकुर्यात्स्वहिताप्तये॥५॥तत्राचार्याः स्वेष्टपरदेवतानुसंधानलक्षणंमंगलंनिर्विघ्नग्रं
थसमाप्तयेस्वमनसिकृत्वाशिष्यशिक्षायैग्रंथादौनिबध्नंति॥श्रीहरिमिति॥अहंतंनमामीत्यन्वयः॥अत्रेयंप्रक्रि
या॥पदार्थोद्विविधः॥आत्मानात्माचेति॥तत्रात्मापिद्विविधः॥ईश्वरोजीवश्चेति॥एतावपिद्विविधौ॥शुद्धाशु
द्धभेदात्॥तत्राशुद्धौमायाविद्योपाधित्वेनभेदव्यवहारहेतू॥शुद्धावभेदव्यवहारहेतू॥तथाऽनात्मापित्रिविधः
॥कारणसूक्ष्मस्थूलभेदात्॥एतदेवशरीरत्रयमितिव्यवह्रियते॥एवंचिज्जडरूपवैलक्षण्यात्तमःप्रकाशयो
रिवविभक्तयोरुभयोरात्मानात्मनोरविवेकएवबंधकारणं॥तयोर्विवेकस्तुमोक्षकारणमितिदिक्॥तत्रतावद
हंशब्देनदेहत्रयविशिष्टत्वेनाशुद्धोजीवः॥अस्यैवापकृष्टत्वात्॥तंनमामिमायातत्कार्यैर्हैन्यत्वेपितदाश्रयभूत राम:
त्वेनसर्वकारणंवेदांतप्रसिद्धमीश्वरं॥एतस्यैवसर्वोत्कृष्टत्वात्॥नमामिनमस्करोमि॥स्वात्मत्वेनानुसंदधामीत्य १

श्रू२

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्थः॥तदेवसर्वोत्कृष्टत्वेनानुसंधानयोग्यत्वमाह॥कीदृशंतं॥श्रीहरिमिति॥श्रियंदधानमित्यर्थः॥तदेवंसर्वो
त्कृष्टत्वेनांतेस्वाश्रयतयास्वीक्रियतेप्रलयसुषुप्त्यादौसर्वभूतैरितिश्रीर्जीवत्वोपाधिभूताविद्यातांहरत्यात्मज्ञानप्र
दानेननाशयतिइतिश्रीहरिः॥यद्वासएवसर्वाधिष्ठानतयाश्रीरित्युच्यते॥सएवहरिस्तं॥ननुकिमनेनाविद्यानत्का
र्यहरणेनेत्याशंक्यपरमपुरुषार्थप्राप्तिर्भवतीत्याह॥पुनःकीदृशंतं॥परमानंदमिति॥परमोऽविनाशित्वनिरतिश
यत्वाभ्यामुत्कृष्टआनंदःसुखविशेषस्तद्रूपमित्यर्थः॥तर्हिवैषयिकसुखवज्जडःस्यादित्यतआह॥उपदेष्टारमिति

श्रीहरिंपरमानंदमुपदेष्टारमीश्वरं॥ व्यापकंसर्वलोकानांकारणंतंनमाम्यहं ॥१॥ ॥

॥आचार्यद्वाराऽऽत्मसुखोपदेशकंचिद्रूपमित्यर्थः॥ननुकेवलानंदस्यकथमुपदेष्टृत्वमित्यतआह॥ईश्वरमभीष्टेऽसा
वीश्वरस्तंनमामीतिवान्वयः विचित्रशक्तित्वात्सर्वसमर्थमित्यर्थः॥एवमपिपरिच्छिन्नत्वाद्घटादिवदनात्मत्वंस्या
दित्यतआह॥व्यापकमिति॥स्वसत्ताप्रकाशाभ्यांनामरूपेव्याप्नोतिसव्यापकस्तं॥परिच्छेदकस्यदेशकालादेर्मा
यिकत्वादनंतमित्यर्थः॥ननुव्याप्यव्यापकभावेनानंतत्वमसिद्धमित्यतआह॥सर्वलोकानांकारणमिति॥अ
भिन्ननिमित्तोपादानमित्यर्थः॥सत्यंज्ञानमनंतंब्रह्म॥आत्मनात्मानमभिसंविवेशेत्यादिश्रुतेः ॥१॥ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अ.नु. इदानींप्रेक्षावत्प्रवृत्तयेऽनुबंधचतुष्टयंदर्शयन्स्वचिकीर्षितंप्रतिजानीते॥अपरोक्षेति॥वेदत्रय्येनविद्वदनुभ
२ वंप्रमाणयति॥तथाचायमर्थः॥विद्वदनुभवप्रसिद्धायातत्त्वमस्यादिमहावाक्यश्रवणजाप्रत्यगभिन्नब्रह्मविष
याअपरोक्षानुभूतिरक्षाणामिंद्रियाणांपरोतीतोनभवतीत्यपरोक्षमिंद्रियाधिष्ठानतत्प्रकाशत्वाभ्यांनित्यप्रत्यक्ष
स्वप्रकाशमात्मतत्त्वंतस्यानुभूतिर्वृत्त्यारूढाखंडता॥यद्वापरोक्षाचासावनुभूतिश्चेत्यपरोक्षानुभूतिर्विद्याऽपरप
र्यायोब्रह्मसाक्षात्कारस्तत्साधनग्रंथोप्युपनिषच्छब्दवदपरोक्षानुभूतिशब्देनोपचर्यते॥ज्ञादित्यवलोकनमात्रेणे

अपरोक्षानुभूतिर्वैप्रोच्यतेमोक्षसिद्धये॥सद्भिरेवप्रयत्नेनवीक्षणीयामुहुर्मुहुः॥ २॥

वोत्तमाधिकारिणांब्रह्मात्मसाक्षात्कारकारणंग्रंथविशेषइत्यर्थः॥अनेननित्यापरोक्षब्रह्मात्मतत्त्वंविषयोदर्शितः॥
सप्रोच्यतेप्रकर्षेणतत्तदाशंकानिरासार्थपूर्वकंसिद्धांतरहस्यप्रदर्शनरूपेणोच्यतेकथ्यतइत्यर्थः॥अस्माभिःपू
र्वाचार्यैरित्यर्थादध्याहारः॥ननुप्रायोप्रयोजनमनुद्दिश्यनमंदोपिप्रवर्ततइतिन्यायान्नारंभणीयोग्रंथइत्याशं
क्यप्रयोजनमाह॥मोक्षसिद्धयेमोक्षोनामस्वाविद्याकल्पिताऽनात्मदेहाद्यात्मत्वाभिमानरूपबंधनिवृत्तिद्वारास्व राम:
स्वरूपानंदस्यानंतस्यसिद्धिः प्राप्तिस्तदर्थंअनेनसर्वानर्थनिवृत्तिद्वारापरमानंदावाप्तिरूपंप्रयोजनंदर्शितं॥ २

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किंलक्षणाऽपरोक्षानुभूतिः॥सद्भिः साधुभिर्नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसंपन्नैर्मुमुक्षुभिरित्यर्थः॥ए
वशब्दान्नान्यैः कर्मोपासनाधिकारिभिरितिभावः॥मुहुर्मुहुर्नैरंतर्येदीर्घकालाभ्यासप्रयत्नेनस्नानभिक्षादावप्य
नादरंकृत्वेत्यर्थः॥वीक्षणीयागुरुमुखादवगत्यविचारणीया॥अनेनमुमुक्षुरधिकारीदर्शितः॥एतेनैवार्थात्सूत्रोक्ता
ज्ञानकांडयोः साध्यसाधनभावः संबंधश्चदर्शितोभवतीतिबोद्धव्यं॥२॥ननुकार्यस्यकारणाधीनत्वात्सूत्रो
क्तसाधनचतुष्टयस्यकिंकारणमित्याशंक्याह॥स्ववर्णेति॥अत्रस्वशब्देनमुख्यगौणमिथ्येतित्रिविधेषुसा

स्ववर्णाश्रमधर्मेणतपसाहरितोषणात्॥साधनंप्रभवेत्पुंसांवैराग्यादिचतुष्टयं॥३॥

क्षिपुत्रादिदेहादिलक्षणेष्वात्मसुमध्येमिथ्यात्मायोग्यत्वाद्गृह्यते॥तस्यदेहादेर्ब्राह्मणादिवर्णब्रह्मचर्याद्याश्र
मप्रयुक्तेनधर्मेणब्रह्मार्पणकृतकर्मानुष्ठानजन्येनापूर्वेणपूर्वमीमांसाप्रसिद्धेनभाविफलाधारभूतेनपुण्यादि
शब्दवाच्येनदृत्यर्थः॥तथातपसाकृच्छ्रचांद्रायणादिनाप्रायश्चित्तेनेत्यर्थः॥पुनःहरितोषणाद्भगवत्प्रीतिकरात्स
र्वभूतदयालक्षणात्कर्मविशेषात्॥एतैस्त्रिभिःसाधनैःवैराग्यादिचतुष्टयरूपंसाधनंमोक्षसाधकोधर्मवि
शेषःपुंसांभवेत्संभावनायांलिङ्॥यद्वैवमन्वयः॥स्ववर्णाश्रमधर्मरूपेणतपसाकृत्वायद्धरितोषणंतस्मादिति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अ.उ. यद्यपिसाधनचतुष्टयस्यविवेकादिक्रमेणहेतुहेतुमद्भावनातथापिवैराग्यस्यासाधारणकारणतांद्योतयितुंआ टी.
३ दौग्रहणंकृतमितिबोद्धव्यं॥३॥कीदृशंतद्वैराग्यादिचतुष्टयमित्याकांक्षायांतत्स्वयमेवव्याचष्टे॥ब्रह्मादीत्यार
भ्योक्तसाधनेत्वंतेनश्लोकषट्कात्मकेनग्रंथेन॥ब्रह्मादिस्थावरांतेषुसत्यलोकादिमर्त्यलोकांतेषुभोगसाधनेषु
अनुक्रमेजन्यत्वेनानित्यत्वंलक्षीकृत्येत्यर्थः॥वैराग्यंत्यागेच्छा॥अत्रदृष्टांतमाह॥यथैवकाकविष्ठायांवैराग्यंगर्द
भादिविष्ठायामपिकदाचित्कस्यचित् ज्वरशांत्यर्थंग्रहणेच्छाभवति॥अतःकाकविष्ठायाःग्रहणं॥उपलक्ष

ब्रह्मादिस्थावरांतेषुवैराग्यंविषयेष्वनु॥यथैवकाकविष्ठायांवैराग्यंतद्धिनिर्मलं॥४॥नित्य
मात्मस्वरूपंहिदृश्यंतद्विपरीतगं॥एवंयोनिश्चयःसम्यक्विवेकोवस्तुनःसवै॥५॥

णमेतत्कूर्दितवां
तादीनां॥अत्रहेतुः॥हियस्मात्तद्वैराग्यंनिर्मलंरागादिमलरहितं॥४॥इदानींवैराग्यकारणविवेकंलक्षयति॥नि
त्यमिति॥वेदप्रसिद्धंसवस्तुनःपदार्थस्यविवेकोविवेचनविशेषाज्ञेयः॥सकइत्यतआह॥यएवंप्रकारेणसम्यक्
संशयादिशून्योनिश्चयः॥एवंकथमित्याहहीतिविद्वदनुभवप्रसिद्धमात्मस्वरूपंनित्यमविनाशिआबाध्यंसत्य रामः
मित्यर्थः॥अविनाशीवाअरेयमात्मेतिश्रुतेः॥दृश्यमनात्मस्वरूपंतद्विपरीतगंतदात्मस्वरूपंतस्माद्विपरीतत्वेनग ३

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यवहारभूमिमितितथाविधंविनाशिबाध्यमित्यर्थः॥अत्रेदमनुमानमपिसूचितंभवतिआत्मस्वरूपंनित्यंदृष्टत्वात् पन्ननित्यंतन्नदृष्टंयथाघटादीतिकेवलव्यतिरेकीहेतुः॥तथानात्मस्वरूपमनित्यंदृश्यत्वात्॥यत्नानित्यंतन्नदृश्यंयथात्मस्वरूपमित्ययमपिकेवलव्यतिरेकीहेतुः॥५॥तदेवंवैराग्यकारणंविवेकंव्याख्यायवैराग्यकार्यंशमादिषट्कंलक्षयति॥सदेत्यादिचतुर्भिःश्लोकैः॥सदैवसर्वस्मिन्नपिकालेवासनात्यागःपूर्वसंस्कारोपेक्षायंशमइतिशब्दितोंतःकरणनिग्रहःशमशब्दार्थइत्यर्थः॥बाह्यवृत्तीनांश्रोत्रवागादीनांनिग्रहोनिषिद्धप्रवृत्तितिरस्कारोदमइति

सदैववासनात्यागःशमोयमितिशब्दितः॥निग्रहोबाह्यवृत्तीनांदमइत्यभिधीयते॥६॥विषयेभ्यः
परावृत्तिःपरमोपरतिर्हिसा॥सहनंसर्वदुःखानांतितिक्षासाशुभामता॥७॥

शब्देनाभिधीयतेकथ्यते॥६॥

हीतिप्रसिद्धेभ्योविषयेभ्योबंधकेभ्यःशब्दादिभ्यायापरावृत्तिर्निवृत्तिरनित्यत्वादिदोषदर्शनेनग्रहणानिच्छासोपरतिरुच्यतइत्यर्थः॥अनेनसर्वकर्मसन्यासउपलक्ष्यते॥तत्रहेतुमाह॥कीदृशीसापरमोत्कृष्टात्मज्ञानंयस्मात्तत्साधनभूतेत्यर्थः॥ किंचसर्वदुःखानांयत्सहनंप्रतिकाराणिच्छासाशुभा॥सुखरूपातितिक्षामतांविदुषामित्यर्थः॥किंचसर्वदुःखानांसर्वदुःखसाधनानांशीतोष्णादिद्वंद्वानामित्यर्थः ॥ ७ ॥ ॥ ॥ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपिचनिगमाचार्यवाक्येषुवेदगुरुवचनेषुयद्वोपनिषत्स्वारम्भान्नुपदेशेषुभक्तिर्भजनंविश्वासइत्यर्थः॥साश्र
द्धेतिविश्रुतावेदांतप्रसिद्धा॥तुपुनः॥सल्लक्ष्येसदेवसोम्येदमग्रआसीदित्यादिश्रुतिलक्ष्येप्रत्यगभिन्नेब्रह्मणिचि
त्तैकाग्र्यंतदेकजिज्ञासेत्यर्थः॥तत्समाधानमितिस्मृतं॥८॥एवंशमादिषट्कमभिधायतत्कार्यभूतांमुमुक्षुतामाह
॥संसारबंधेति॥इतियासुदृढाबुद्धिस्सामुमुक्षुतावक्तव्येत्यन्वयः॥साकेत्यतआह॥भोविधेमदैवयद्वासर्वकर्त्त
र्विधातर्ब्रह्मन्मेममसंसारबंधनिर्मुक्तिर्नाना,योनिसंबंधनिवृत्तिःकदाकस्मिन्कालेकथंकेनप्रकारेणभवेदि

निगमाचार्यवाक्येषुभक्तिःश्रद्धेतिविश्रुता॥चित्तैकाग्र्यंतुसल्लक्ष्येसमाधानमितिस्मृतं॥८॥संसार
बंधनिर्मुक्तिःकथंस्यान्मेकदाविधे॥इतियासुदृढाबुद्धिर्वक्तव्यासामुमुक्षुता॥९॥उक्तसाधनयु
क्तेनविचारःपुरुषेणहि॥

त्येवंरूपाबुद्धिर्मुमुक्षुतेत्यर्थः॥९॥इदंसाधनचतुष्टयंयदर्थमुपन्यस्तंतदिदा
नींदर्शयति॥उक्तेति॥उक्तानिब्रह्मादौसत्यस्यसंसारेस्यंतग्रंथसंदर्भेणवर्णितानियानिवैराग्यादिसाधनानिज्ञानो
पकरणानितैर्युक्तेनपुरुषेणाधिकारिणादेहवतामनुष्योत्तमेनहीति विद्वत्प्रसिद्धत्वेनवक्ष्यमाणलक्षणःयद्वा
हीत्यव्ययमेवार्थेअन्यनिषेधार्थे॥विचारोविवेकःकर्त्तव्य आवर्त्तयितव्यः.किमर्थमित्यतआह॥आत्मनोज्ञानसिध्यर्थं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननुआत्मज्ञानसिध्याकः पुरुषार्थइत्याशंक्यमोक्षाख्यंचतुर्थपुरुषार्थरूपंफलंद्योतयन्पुरुषार्थंविशिन
ष्टि॥ शुभंपरमानंदरूपत्वेनमंगलंमोक्षसुखमित्यर्थः॥ इकृत्वाप्रार्थयताऽत्मनःशुभमितिवान्वयः॥१०॥ ननुज्ञा
नसिध्यर्थंविचारएवकर्त्तव्यइतिनियमःकुतःकि॑यतइत्याशंक्यसदृष्टांतमाह॥ विचारेणविनान्यसाधनैःक
र्मोपासनालक्षणैर्ज्ञाननोत्पद्यते॥ अत्रदृष्टांतः॥ यथाकचित्कस्मिंश्चिद्देशेसूर्यादिप्रकाशेनविनापदार्थभानंघटादि

कर्तव्योज्ञानसिध्यर्थमात्मनःशुभमिकृता॥१०॥ नोत्पद्यतेविनाज्ञानंविचारेणान्यसाधनैः॥ यथा
पदार्थभानंहिप्रकाशेनविनाकचित्॥११॥ कोहंकथमिदंजातंकोवैकर्त्तास्यविद्यते॥ उपादानंकिम
स्तीहविचारःसोयमीदृशः॥१२॥

वस्तुप्रकाशोनभवति॥ हीतिसर्वजनप्रसिद्धं॥ तथातद्वदित्यर्थः अतोनिय
मःक्रियतइतिभावः॥११॥ सविचारःकीदृशइत्यतआह॥ अहंकर्त्तासुखीत्यादिव्यवह्रीयमाणःकः किंस्वरूपः तथाइ
दंजगत्स्थावरजंगमात्मकंकथंकस्माज्जातंकिमधिष्ठानमित्यर्थः॥ तथास्वप्रत्यक्षादिप्रमाणसिद्धस्यकर्तोत्पा
दकःकोविद्यते॥ वैइतिविकल्पंद्योतयति॥ किंजीवादृष्टंकर्तृ किंवेश्वरः॥ किंवाअन्यदेवकिंचिदितिविकल्पः॥ किं
चेहजगतिउपादानमुत्पादकंकिमस्ति॥ अयमात्माजगत्कारणविषयईदृशएवंस्वरूपोविचारः॥ सएवज्ञानसाधनमि



For Private and Personal Use Only

अ·नु· ननुचैतन्यविशिष्टःकायःपुरुषइतिवार्हस्पत्यसूत्रात्देहाकारेणपरिणतानिपृथिव्यादिचत्वारिभूतान्येवा
५ त्मेतिचार्वाकावदंति॥सएवकर्तासुखीत्यादिसर्वव्यवहारमूलमितिसर्वजनप्रसिद्धोस्त्यामात्मविषयोविचा
रोनस्यादित्यतआह॥अहमहंशब्दप्रत्ययालंबनोभूतगणोयोदेहःसनभवामि॥घटादिवद्दृश्यत्वादित्यर्थः॥
तर्हींद्रियगणस्त्वंस्यादितिचार्वाकैकदेशिमतमुत्थाप्यदूषयति॥चपुनरक्षगणःश्रोत्रादींद्रियसंघातोप्यहंनभवा
मि॥तथेतिपदेनदेहवदिंद्रियगणस्यापिभूतविकारत्वंदर्शितं॥सवाएषपुरुषोन्नरसमयः॥अन्नमयंहिसोम्यम

नाहंभूतगणोदेहोनाहंचाक्षगणस्तथा॥एतद्विलक्षणःकश्चिद्विचारःसोयमीदृशः॥१३॥अज्ञानप्रभ
वंसर्वंज्ञानेनप्रविलीयते॥

नआपोमयः॥प्राणस्तेजोमयीवागित्यादिश्रुतिरुभयत्रप्रमाणं॥ननुदेहद्वयंयदि
त्वंनासितर्हिशून्यएवस्यादित्याशंक्याह॥एतद्विलक्षणएताभ्यांस्थूलसूक्ष्मदेहाभ्यांविपरीतधर्मकोस्मि॥अस्थूल
मनण्वह्रस्वमित्यादिश्रुतेः॥कश्चिदितिजात्यादिरहितत्वान्मनोवाचामगोचरत्वंदर्शितं॥अयमीदृशःसविचारइति
व्याख्यातार्थश्चतुर्थःपादःश्लोकचतुष्टयेपिबोद्धव्यः॥१२॥तदेवंकोहमित्येतन्निश्चित्येदानींकथमिदंजातमित्यस्यनि रमः
श्चयःक्रियते॥तत्रपृथिव्यादिभूतकार्यत्वात्स्वस्वपरमाणुभ्योजायतइतितार्किकादयोमन्यंते॥कर्मणोजायतइतिमीमांसकाः॥५

प्रधानादेवेतिसांख्याः॥तदेतन्निराकुर्वन्नाह॥सर्वंजगदिदंनामरूपात्मकमज्ञानप्रभवमज्ञानात्पूर्वोक्तस्वस्वरूपा
स्फुरणात्प्रभवतितथाविधंअतएवैतद्विरोधिनाज्ञानेनस्वस्वरूपस्फुरणेनतमइवप्रकाशेनप्रविलीयतेसर्वमित्य
र्थः॥कोवैकर्त्तेत्यस्यनिर्णयमाह॥विविधोनानाप्रकारःसंकल्पइदंकरिष्यामीत्यादिलक्षणोंतःकरणपरिणामःकर्त्ता
कारणानुकूलव्यापारवान्शेषंपूर्वोक्तं॥१४॥अथोपादानंकिमस्तीत्यस्यनिर्णयमाह॥एतयोरज्ञानसंकल्पयोर्यदुपा

संकल्पोविविधःकर्त्ताविचारःसोयमीदृशः॥१४॥एतयोर्यदुपादानमेकंसूक्ष्मंसदव्ययं॥यथैवमृद्धटा
दीनांविचारःसोयमीदृशः॥१५॥

दानंस्थितिनाशयकारणंतत्तुसत्कालत्रयाबाध्यंब्रह्मैवनान्यदित्यर्थः॥अतए
वाधिष्ठानज्ञाननिवर्त्यज्ञानकार्यत्वेनमिथ्याभूतमपिजगद्यावत्ज्ञानोदयंरज्जुसर्पादिवत्संसारभयव्यवहारक्षमंभवेदि
तिभावःब्रह्मणःसत्वेहेतुःअव्ययमपक्षयरहितं॥अनेनैतत्पूर्वीयाअपिजन्मादिपंचविकारानिरस्ताषड्भावविकाराराहि
त्येहेतुः॥एकंसजातीयादिभेदशून्यं॥तर्हिकुतोनदृश्यतेतत्राह॥सूक्ष्मंमनोवागादींद्रियागोचरंजातिक्रियादिप्र
वृत्तिनिमित्तशून्यत्वादित्यर्थः॥अत्रदृष्टांतमाह॥यथैवमृद्धटादीनामुपादानंतथैवेत्यर्थः॥एवंप्रकारेणकार्यकार
णभेदोनाममात्रमितिसूचितं॥१५॥ननुयद्यपिकार्यकारणभेदोवाचारंभणमात्रस्तथापिजीवब्रह्मणोर्भेदोवा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहमिति अत्र एव इत्यध्याहारस्तथा चायमर्थः॥ यतोहमहंप्रत्ययवेद्योप्येकः सजातीयादिभेदशून्यो मनुष्यमा
त्रेप्यहंबुद्धेरेकप्रतीतेरित्यर्थः॥ च पुनः सूक्ष्म इंद्रियागोचरः॥ पुनर्ज्ञाता ऽहंकारादिप्रकाशकत्वेन चेतन इत्य
र्थः॥ तथा साक्षी साक्षादिंद्रियार्थसंनिकर्षं विनैवेक्षते पश्यति प्रकाशयतीति साक्षी निर्विकार इत्यर्थः॥ अत
एव सदव्ययः संश्चासावव्ययश्च विनाशापक्षयोपलक्षितसर्वविकारशून्य इत्यर्थः यस्मादेवंभूतोहं तत्तस्माद
हमहंप्रत्ययवेद्यस्तत्सत्यज्ञानादिलक्षणं ब्रह्म॥ अत्र संदेहो नास्तीत्यर्थः॥ सोयमीदृशो विचार इति॥ १६॥ एतदे

अहमेकोपि सूक्ष्मश्च ज्ञाता साक्षी सदव्ययः॥ तदहं नात्र संदेहो विचारः सोयमीदृशः॥ १६॥ आ
त्मा विनिष्कलो ह्येको देहो बहुभिरावृतः॥

वजीवब्रह्मैक्यमज्ञानप्रदर्शनेन द्रढयति॥ आत्मेत्यादि पंच
भिः॥ यतोहंप्रत्ययवेद्य आत्मा अततीति सततभावेन जाग्रदादिसर्वावस्थास्वनुवर्तत इत्यात्मा अवस्थात्रयभावाभा
वसाक्षित्वेन सत्यज्ञानादिस्वरूप इत्यर्थः॥ स त्वंपदलक्ष्यार्थोपि तत्पदलक्ष्यार्थ एव विनिष्कलो विशेषेण निर्गत
कलो निरवयव इत्यर्थः॥ अन्यथा सावयवत्वे घटादिवद्विनाशित्वापत्तिरिति भावः॥ अत्र हेतुः एक हि इति एकमे
वाद्वितीयमित्यादिश्रुतिसिद्धिं द्योतयति॥ ननु तथा लिंगदेहोप्यस्तीति चेन्न देहो लिंगदेहः सूक्ष्मशरीरमिति यावत्॥



For Private and Personal Use Only

स:बहुभि:कलाभि:श्रोत्रादिबुद्ध्यंताभि:सप्तदशभिरावृतआछादितस्तत्संघातइत्यर्थ:॥अतएवलिंगदेह
स्यनिरवयवत्वाद्यभावात्ज्ञानेनतत्कारणाज्ञाननिवृत्तौनिवृत्तिरन्यथाऽनिर्मोक्षप्रसंगइतिभाव:॥एवमति
वैलक्षण्येसत्यपितयोरात्मदेहयो:प्रकाशतमसोरिवैक्यमैकात्म्यंप्रपश्यंतितार्किकादयइत्यर्थ:॥अतोवि
परीतदर्शनात्परमन्यदज्ञानंकिमस्तिएतदेवाज्ञानमित्यर्थ:॥विपर्ययरूपकार्यान्यथानुपपत्यातत्कारणंमू
लाज्ञानंकल्प्यतइतिभाव:॥१७॥पुनर्वैलक्षण्यमाह॥आत्मेति॥आत्मानियामकोनियंतावपुनरंत:पंचकोशां

तयोरैक्यंप्रपश्यंतिकिमज्ञानमत:परं॥१७॥आत्मानियामकश्चांतर्देहोबाह्योनियम्यक:॥तयोरै
क्यंप्रपश्यंतिकिमज्ञानमत:परं॥१८॥आत्माज्ञानमय:पुण्योदेहोमांसमयोऽशुचि:॥तयोरैक्यंप्रप
श्यंति०॥१९॥आत्माप्रकाशक:स्वछोदेहस्तामसउच्यते॥तयोरैक्यं०॥२०॥

तर:देहस्तुनियम्य:सन्बाह्य:त
योरैक्यमित्युत्तरार्धंव्याख्यातंएवमग्रेपिज्ञेयं॥१८॥अन्यदपिवैलक्षण्यमाह॥आत्माज्ञानमय:प्रकाशस्वरूपोऽतए
वपुण्य:शुद्धोदेहस्तुमांसादिविकारवानतएवाशुचि:॥एतेनस्थूलदेहस्यापिवैलक्षण्यमुक्तंभवतितयोरैक्यमि
त्यादिपूर्ववत्॥१९॥वैलक्षण्यांतरमाह॥आत्मास्वयंप्रकाश:सन्सूर्यादिवदन्यत्सर्वंप्रकाशकोऽतएवस्वछ:प्रका

वृत्ति४

अ॰नु॰ ७ असंगोह्ययंपुरुष इत्यादिश्रुतेः देहस्तुतामसोघटादिवत्प्रकाश्यत्वेनजडः तयोरैक्यमित्यादि पूर्ववत्॥२०॥अ
त्रसर्वत्रपौनरुक्त्यंनाशकनीयमात्मनोऽलौकिकत्वेनायंतदुर्बोधत्वादिति॥अतएवबहुधावैलक्षण्यंप्रदर्श्य
तेपरमकारुणिकैःश्रीमदाचार्यैआत्मानित्योध्वंसाप्रतियोगी॥तत्रहेतुःहियस्मात्सद्रूपः॥अबाध्यस्वरूपःदेह
स्तुध्वंसानुयोगी॥अत्रापिहेतुःहीयस्मात्सन्मयोऽनित्यःविकारित्वेनबाधयोग्यइत्यर्थः यस्मादेवमात्मदेहयो
रत्यंतवैलक्षण्यंतस्मात्तयोरैक्यदर्शनंकेवलमज्ञानमिति॥२१॥नन्वात्मनःप्रकाशत्वंकिन्नामेत्यतआह॥आ

आत्मानित्योहिसद्रूपोदेहोनित्योह्यसन्मयः॥तयोरैक्यंप्रपश्यंति॥२१॥आत्मनस्तत्प्रकाशत्वं
यत्पदार्थावभासनं॥नाग्न्यादिदीप्तिवद्दीप्तिर्भवत्यांध्ययतोनिशि॥२२॥ त्मनस्तत्प्रकाशत्वंबोद्धव्यंकिं

तदित्यतआह॥यत्पदार्थावभासनं॥घटपटादिवस्तुविषयप्रकाशइदंतयानिर्दिश्यमानंविषयदर्शनमितियाव
त्॥तर्ह्यग्न्यादिवद्विकारीस्यादित्यतआह॥नाग्न्यादिदीप्तिवद्दीप्तिरियमात्मदीप्तिरग्न्यादिदीप्तिवत्कादाचित्क
त्वादुत्पत्तिविनाशादिविकारवतीत्यर्थः॥तत्रहेतुः॥भवत्यांध्यंयतोनिशि॥यतःकारणान्निशिरात्रावग्न्यादिदीप्त्या
एकस्मिन्देशेलोकस्यांध्यरूपग्रहाक्षमत्वंभवति॥तस्मादग्न्यादिदीप्तीनामपिदीपिकाऽन्यसाधननिरपेक्षायादी

रासः
७

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदेवंप्रकाश्यप्रकाशकत्वादिलक्षणवैलक्षण्येसत्यपिआत्मानात्माभेददर्शिनमुपहसन्नुभयोर्भेदंस्पष्टयति॥अह
महंशब्दप्रत्ययालंबनमयमिदंतयानिर्दिश्यमानोघटादिवत्प्रत्यक्षतयादृश्यमानोदेहोस्मीत्युभयोर्दृष्टृदृश्ययोरै
क्यंकृत्वामूढः स्वात्मानकार्यविपर्ययमोहव्याप्तोजनस्तिष्ठति॥कृतकृत्यत्वबुध्यानिर्व्यापारोभवतीत्यर्थः॥एतद
होमहदज्ञानमितिभावः॥किंकृत्वापीत्याह॥ममसंबंधीअयंदेहइतिसामान्यतोभेदंज्ञात्वापि॥अतएवाश्चर्य
मितितात्पर्यं॥कइव॥सर्वदाघटद्रष्टेव॥यथासर्वकालेघटद्रष्टापुरुषोममायंघटइतिजानाति॥नत्वहंघटइतिक

देहोहमित्ययंमूढोधृत्वातिष्ठत्यहोजनः॥ममायमित्यपिज्ञात्वाघटद्रष्टेवसर्वदा॥२३॥ब्रह्मैवाहंसमः
शांतःसच्चिदानंदलक्षणः॥ दा॥विदपिजानातीत्यर्थः॥२३॥नन्वनस्मिंस्तद्बुद्धिरितिलक्षणभ्रमापरपर्याय
मोहकार्यलिंगानुमेयाज्ञानमीरकृतहर्येतन्निवर्त्तकंकिमित्याकांक्षायांतद्विरोधित्वादात्मज्ञानमेवात्माज्ञाननिव
र्तकमित्यभिप्रेत्यतल्लक्षणमाह॥ब्रह्मेत्यादिपंचभिःअहमहंशब्दप्रत्ययालंबनंप्रत्यगात्मा ब्रह्मैवास्मि॥एतयोस्त्व
त्वंपदार्थयोरैक्येहेतुगर्भितानिविशेषणानि॥किंलक्षणोहं॥सत्ताप्रकाशाभ्यांसर्वाभिन्नःपुनःकिंलक्षणः॥शां
तःनिरस्तसमस्तोपाधित्वाद्विक्षेपादिविकारशून्यः॥पुनःकिंलक्षणः॥सच्चिदानंदलक्षणः॥सच्चिदानंदैरनृतजडदुः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 विरुद्धांशत्यागलक्षणयाभागलक्षणयाज्ञायतइतिसच्चिदानंदलक्षणः॥ब्रह्मबोधेहिद्विविधंद्वारंविधिर्निषेध 
श्चेति॥तत्रसत्यज्ञानादिसाक्षाद्वाचकशब्दप्रयोगलक्षणोविधिरुक्तः॥इदानीमतन्निरसनलक्षणोनिषेधः
प्रदर्श्यते॥अहमहंशब्दप्रत्ययालंबनंदेहोनेत्यन्वयः॥देहइत्युपलक्षणंप्राणेंद्रियादीनामपि॥हीतिविद्वज्ज
नप्रसिद्धं॥देहादेरनात्मत्वेहेतुमाह॥असद्रूपोऽसत्बाध्यमनृतमित्यर्थः॥तादृग्रूपंस्वरूपंयस्यसतथावि
धः॥इत्येवंप्रकारमहंब्रह्मास्मीत्यादिमहावाक्यजन्याखंडार्थाकाराबुद्धिर्ज्ञानंबुधैरात्मतत्त्वज्ञैरुच्यतेकथ्यत

नाहंदेहोह्यसद्रूपोज्ञानमित्युच्यतेबुधैः॥२४॥निर्विकारोनिराकारोनिरवद्योहमव्ययः॥नाहंदेहो॰
॥२५॥

इत्यर्थः॥एतद्विलक्षणःसर्वोज्ञानाभासइतिभावः॥२४॥नन्वहंजातोमृतःसुखीदुःखीत्याद्यनेकवि
कारित्वेनाहंशब्दप्रत्ययालंबनस्यप्रतीयमानत्वात्कथंतस्यब्रह्मत्वमित्यतआह॥निर्विकारइति॥अहमहंश
ब्दप्रत्ययालंबनःप्रत्यगात्मानिर्विकारोस्मीतिशेषः॥निर्गताविकाराजन्मादयोयस्यसतथाविधः॥तेषांदेह
धर्मत्वादितिभावः॥तत्रहेतुः॥निराकारःदेहाद्याकाररहितः॥अतएवनिरवद्योवातपित्तादिजन्याध्यात्मिका 
दितापत्रयरहितइत्यर्थः॥अतएवाव्ययः॥अपक्षयादिदूरइत्यर्थः॥अहंमनुष्यइत्यादिप्रतीतेःकथंनिर्विका 

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रत्वमिति चेत्स्वाप्रतीतिः शुक्तिरजतादिवद्बाध्यत्वाद्भ्रांतेत्याह॥नाहमित्युत्तरार्द्धं व्याख्यातं पूर्वश्लोके॥एवमुत्तरत्रापिज्ञेयं पुनरुक्तिस्तु ज्ञानप्रतिबंधकस्य बुद्धिमांद्यविपर्ययादेर्दोषध्यात नाशंकनीया॥२५॥पुनः किंलक्षणं ज्ञानमित्यत आह॥अहं निरामयः सर्वरोगरहितः॥निराभासोवृत्तिव्याप्यत्वेपि फलव्याप्यत्वशून्यः निर्विकल्पः कल्पनारहितः आततश्च व्यापकः॥२६॥पुनः किंलक्षणं ज्ञानमित्यत आह॥निर्गुण इति॥अहं निर्गुणो गुणरहितः गुणानां मायामयत्वादित्यर्थः॥अत एव निष्क्रियः॥क्रियारहितः॥तथा नित्यो विनाशरहितः॥अत

निरामयो निराभासो निर्विकल्पोहमाततः॥नाहं देहो०॥२६॥निर्गुणो निष्क्रियो नित्यो नित्यमुक्तो
हमच्युतः॥नाहं देहो०॥२७॥निर्मलो निश्चलोनंतो शुद्धोहमजरोमरः॥नाहं देहो०॥ २८॥

एव नित्यमुक्तः कालत्रयेपि बंधशून्यः तत्र हेतुः अच्युतः अप्रच्युतसच्चिदानंदस्वभावः सच्चिदानंदादिस्वभावः॥२७॥पुनरपि ज्ञानलक्षणमाह॥निर्मल इति॥अहं निर्मलः॥अविद्यातत्कार्यलक्षणमलरहितः॥अत एव निश्चलः॥व्यापकत्वादाकाशवत् निश्चल इत्यर्थः॥निश्चलत्वे हेतुः अनंतः देशकालवस्तुपरिच्छेदशून्यः॥शुद्धः अशुद्धिरहितः पुनरजरो जरारहितः अमरो मरणरहितश्च सर्वधर्माणां देहत्रयवृत्तित्वादिति भावः॥ २८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अ॰नु॰ नन्वात्माप्रत्यक्षदेहोनभवतितर्हिशून्यत्वमात्मनःस्यादित्याशंक्याह॥भोमूर्खशून्यवादिन्स्वदेहेपुरुषाख्यंपु टी॰
९ रिमनुष्यशरीरेउषतिअहमाकारेणवसतीतिपुरुषइत्याख्यानामयस्यतं॥अतएवशोभनंमंगलंशरीरविल
क्षणत्वात्इतिमंगलं॥तथासंमतंब्रह्मेत्यादिवाक्यनिर्णीतंचकारादुत्तमःपुरुषस्त्वन्यःइत्यादिस्मृतिनिर्णीतं
घटादिवद्देहदृश्यत्वेनदेहातीतमात्मानंसततभावंसंतंसर्वव्यवहाराधिष्ठानंशून्यंखपुष्पादिवदसंताभाव
रूपंकिंकरोषिकथंमन्यसेमामन्यार्थइतिभावः॥क्वचित्स्वदेहमितिद्वितीयांतःपाठस्तस्मिन्पक्षेदेहात्मवादे

स्वदेहेशोभनंसंतंपुरुषाख्यंचसंमतं॥किंमूर्खशून्यमात्मानंदेहातीतंकरोषिभो॥२९॥स्वात्मानं
श्रृणुमूर्खत्वंश्रुत्यायुक्त्याचपूरुषं॥ ववदति॥उक्तलक्षणंमनुष्यदेहंत्यक्त्वासमानमन्यत्॥२९॥ननुशून्य
वादिनएवाभावापत्तेःशून्यंमास्तुपरंत्वात्मनोदेहातीतत्वेप्रमाणाभावाद्देहएवात्मास्यादित्याशंक्याह॥भोमूर्ख
देहात्मवादिन्चार्वाकत्वंस्वात्मानंस्वकीयमात्मानंपुरुषंदेहातीतंदेहातिरिक्तंश्रुत्या॥तस्माद्वाएतस्मादन्नर
समयात्अन्योंतरआत्मेत्यादिकयाच॥पुनर्युक्त्या॥एकस्मिन्कर्तृकर्मविरोधइत्यादिरूपयाश्रृणु॥अवधार राम:
यदेहातीतत्वेकिमाकारआत्मेत्यतआह॥सदाकारमस्तीत्येतन्मात्रव्यवहारकारणभूताकारोयस्यतं॥ ॥ ॥ ९

For Private and Personal Use Only

एवंविधोस्तीतिचेत्कुतोनदृश्यतइत्यतआह॥भवादृशैः श्रुत्याचार्यश्रद्धाशून्यैः सुदुर्दर्शंसर्वेयादर्शनायोग्यंतत्
स्यदृष्टरूपत्वादेवेत्यर्थः॥यद्वापूर्वश्लोकोक्तद्वितीयापेक्षयासमाधानार्थोयंश्लोकः॥स्वात्मानमिति॥३०॥तदे
वाहाहमित्यादिसप्तभिः परदेहादन्यआत्माहंशब्देनशब्दइत्युपलक्षणंप्रत्ययस्यापिविख्यातःप्रसिद्धःकिंलक्षण
एकएवस्थितएवेतिप्रत्येकमवधारणं॥तुशब्दःपूर्वोक्तवैलक्षण्यद्योतकस्तदेवाह॥स्थूलोदेहकःदेहएवदेह
कःस्वार्थेक प्रत्ययःकथंपुमान्पुरुषःआत्मास्यान्नकथंचिदित्यर्थःदेहस्यानात्मत्वेहेतुमाह॥अनेकतांपरस्परं

देहातीतंसदाकारंसुदुर्दर्शंभवादृशैः॥३०॥अहंशब्देनविख्यातएकएवस्थितःपरः॥स्थू
लस्त्वनेकतांप्राप्तःकथंस्याद्देहकःपुमान्॥३१॥अहंद्रष्टृतयासिद्धोदेहोदृश्यतयास्थितः॥

भिन्नतांप्राप्तःएवंतमःप्रकाशवदतिविलक्षणत्वेपिदेहस्यात्मत्वंब्रुवन्नतिमूढत्वादुपेक्ष्यःइतिभावः॥३१
तदेवातिवैलक्षण्यंदर्शयति॥अहमहंशब्दप्रत्ययालंबनआत्माद्रष्टृतयाशब्दादिविषयप्रकाशतयासि
द्धःशब्दंशृणोमीत्यादिव्यवहारेणप्रसिद्धःदेहस्तुदृश्यतयाशब्दादिवत्प्रकाश्यतयास्थितः॥तत्रहेतुः
मयायंदेहइतिघटादिवत्स्वीयसंबंधितयानिर्देशाद्व्यवहारात्॥एवमुभयोर्वैलक्षण्ये सतिकथंदेहकः

अ॰नु॰ पुमान्स्यादितिव्याख्यातार्थश्चतुर्थः पादः॥ एवमग्रेपिबोद्धव्यं॥३२॥ पुनर्वैलक्षण्यांतरमाह॥ अहमितिव्या टी॰
१० ख्यातार्थंजायतेस्तीत्यादिषड्विकाररहितः॥ तुर्वैलक्षण्येदेहोनित्यंसर्वकालंविकारवान्॥ अत्रकिंप्रमाण
मतआह॥ इतिसाक्षात्प्रत्यक्षप्रमाणेनप्रतीयतेऽनुभूयते॥ एवंसतिकथंस्यादिति॥३३॥ एवंयुक्त्यादेहात्म
नोर्वैलक्षण्यमुक्त्वाश्रुत्याप्याह॥ यस्मात्परंनापरमस्तिकिंचिद्यस्मान्नाणीयोनज्यायोस्तिकश्चित्॥ वृक्षइव

ममायमितिनिर्देशात्कथंस्याद्देहकःपुमान्॥३२॥ अहंविकारहीनस्तुदेहोनित्यंविकारवान्॥ इ
तिप्रतीयतेसाक्षात्कथं०॥३३॥ यस्मात्परमितिश्रुत्यातयापुरुषलक्षणं॥ विनिर्णीतंविमूढे
नकथंस्यात०॥३४॥ सर्वंपुरुषएवेतिसूक्तेपुरुषसंज्ञिते॥ स्तब्धोदिवितिष्ठत्येकस्तेनेदंपूर्णंपुरुषे

णसर्वमिति॥ तयाप्रसिद्धयातैत्तिरीयश्रुत्याकृत्वेतिकरणेतृतीया विनिर्णीतंविचार्यस्थापितंपुरुषस्यात्मनोल
क्षणंविमूढेनविगतमूढभावेनातिचतुरेणश्रुत्यर्थविवेचनकुशलेनेत्यर्थः इयंकर्तरितृतीया अन्यत्पूर्ववत्श्रुत्य
र्थविवेचनकुशलेनेत्यर्थः इयंकर्तरितृतीया॥ विनिर्णीतंविचार्यस्थापितं॥ अन्यत्पूर्ववत्॥ यद्वाश्रुत्येतिकर्तृप रामः
दमस्मिन्पक्षेविमूढेनेतिदेहात्मवादिनंप्रतिसंबोधनंविमूढानांइनस्वामिन्मूर्खशिरोमणित्वादेवश्रुतीर्नाद्रि १०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नकेवलमनयैकयैवश्रुत्यानिर्णीतंकिंत्वन्ययापीत्याह॥यतोहेतोः श्रुत्यावेदाख्यपरदेवतयापुरुषएवेदं
सर्वमितिपुरुषसंज्ञितेसूक्तेप्युच्यतेपुरुषलक्षणमितिपूर्वश्लोकादध्याहारः॥अतःकथंस्यादितिपूर्ववत्
त्॥३५॥अपरयापिश्रुत्येवमेवनिर्णीतमित्याह॥असंगोह्ययंपुरुषइतिश्रुत्याबृहदारण्यकेवाजसनेयोपनि
षदिपुरुषः असंगःप्रोक्तः॥देहकस्त्वनंतमलसंश्लिष्टःकथंप्रमान्स्यादिति॥३६॥तत्रैवान्यप्रकारेणापिदेहात्म

अप्युच्यतेयतःश्रुत्याकथंस्या०॥३५॥असंगःपुरुषःप्रोक्तोबृहदारण्यकेपिच॥अनंतमलसंश्लिष्टःक
थं०॥३६॥तत्रैवचसमाख्यातःस्वयंज्योतिर्हिपूरुषः॥जडःपरप्रकाश्योसौकथंस्याद्देहकःप्रमान्॥३७॥
प्रोक्तोपिकर्मकांडेनह्यात्मादेहादिलक्षणः॥ नोर्वैलक्षण्यंनिरूपितमित्याह॥तत्रैवबृहदारण्यकएवे

त्यर्थः॥अत्रायंपुरुषःस्वयंज्योतिर्भवतीतिश्रुत्यास्वयंज्योतिःपुरुषःसमाख्यातः॥हीतिविद्वत्प्रसिद्धिंद्योतय
ति॥असौघटादिवद्दृश्यःतएवपरप्रकाश्यस्ततएवजडोदेहकः॥कथंप्रमान्स्यादितिव्याख्यातं॥३७॥अ
थास्तामिदंज्ञानकांडंकर्मकांडेपिदेहात्मनोर्भेदएववर्णितइत्याह॥प्रोक्तइति॥हियस्मादुक्तार्थः कर्मकांडेनापिया
वज्जीवमग्निहोत्रंजुहुयादित्यादिरूपेणचित्तशोधककर्मप्रतिपादकेनवेदभागेनेत्यर्थः॥आत्मादेहादिलक्षणः

तं कथमित्याह॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





निस्यः कुत इत्यत आह॥ देहपातानंतरं तत्फलमनित्यं कर्मफलं पत आत्माभुंक्तेऽतो नित्य इत्यर्थः॥ चकारान्न्यायसां
ख्यादावप्येवमेव देहात्मनोर्भेदो वर्णित इति दर्शितं॥ ३८॥ नन्वेवं सति वेदांतिनामपसिद्धांतः स्यादित्यत आह॥ लिं
गं लिंगशरीरं तस्य रोक्षादिधर्मविशिष्टमपं निस्यापरोक्षस्वभावः प्रमान् कथं स्यान्न कथंचिदित्यर्थः॥ चकारात्कार
णशरीरमपि निराकृतं॥ अनयोरपि भेदे नैलक्षण्यरूपं हेतुमाह॥ अनेकसंयुक्तं देवमनुष्यादिनानास्थूलशरीरं
संबंधं यद्वाश्रोत्रादिद्रव्यं तत्सप्तदशकलासंयुक्तं तथा चलं चंचलं मनःप्रधानत्वादित्यर्थः॥ पुनर्दृश्यं ममेदं श्रोत्रं ममे
निस्यश्च तत्फलं भुंक्ते देहपातादनंतरं॥ ३८॥ लिंगं चानेकसंयुक्तं चलं दृश्यं विकारि च॥ अव्यापकम
सद्रूपं तत्कथं स्यात्पुमानयं॥ ३९॥ एवं देहद्वयादन्य आत्मा पुरुष ईश्वरः॥ सर्वात्मा सर्वरूपश्च सर्वा
तीतोहमव्ययः॥ ४०॥ इत्यात्मदेहभागेन प्रपंचस्यैव सत्यता॥ ~ दं मन इत्यादि ममतास्पदत्वेनात्मन
उपसर्जनभूतं च पुनर्विकारि उपचयादिमत्॥ अव्यापकं परिछिन्नमसद्रूपमात्मज्ञानैकबाध्यं च॥ अत्रेदमाकूतं॥
यद्यपि लिंगशरीराध्यासेनात्मनः कर्तृत्वभोक्तृत्वादिभावस्तथाप्यात्मनः स्वतस्तदभावज्ञानाध्यासनिवृत्तावक
र्तृभोक्तृत्वादिभावसिद्धिरिति वेदांतिनां न किंचिदप्यपसिद्धांतोऽन्यवदिति मंगलं॥ ३९॥ इदानीं पूर्वोक्तमर्थमु
पसंहरति॥ एवं पूर्वोक्तप्रकारेण देहद्वयात्स्थूलसूक्ष्मलक्षणादन्यो भिन्न आत्मा कोसावित्याह॥ पुरुषः शरीराधि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ईश्वरस्तत्र हेतुः॥सर्वात्मा तर्ह्येहे तद्धानिः स्यादित्यत आह॥सर्वरूपः एवं सति विकारित्वं स्यादत आह॥सर्वा
तीतः एतादृश आत्मा चेदस्ति नर्हि कुतो नोपलभ्यत इत्यत आह॥अहं प्रत्ययसोऽहं शब्दप्रत्ययालंबनत्वेन स
र्वदोपलब्धिस्वरूप इत्यर्थः॥तर्ह्यहंकारः स्यान्नेत्याह॥अव्ययः अपक्षयादिविकारशून्यः॥अहंकारसा
क्षीति भावः॥४०॥नन्वात्मनो देहद्वयातिरिक्तत्वप्रतिपादनमनर्थकमिति शंकते॥इतीति॥इति पूर्वोक्त
प्रकारेण वर्णितेनात्मदेहविभागेन प्रपंचस्यैव सत्यत्वेव तथोक्ता यथा तर्कशास्त्रेण ततः प्रपंचसत्यत्वप्र

यथोक्ता तर्कशास्त्रेण ततः किं पुरुषार्थता॥४१॥इत्यात्मदेहभेदेन देहात्मत्वं निवारितं॥इदानीं
देहभेदस्य ह्यसत्त्वं स्फुटमुच्यते॥४२॥चैतन्यस्यैकरूपत्वाद्भेदो युक्तो न कर्हिचित्॥ तिपादनात्किं पुरु

षार्थता कुत्सितपुरुषार्थत्वं भयनिरसभावादित्यर्थः॥द्वितीयाद्वै भयं भवतीति श्रुतेः॥४१॥भेदज्ञानस्याभेद
ज्ञानं प्रति कारणत्वादात्मदेहविभागकथनं नानर्थकमित्याह॥इतीति॥इति पूर्वोक्तेनात्मदेहभेदेनात्मनो देहात्पृथक्
करणेन देहस्यैव प्राधान्यं चार्वाकमतेनात्मत्वं तन्निवारितं॥इदानीमुत्तरग्रंथेन तस्य देहभेदस्यासत्त्वमात्मसत्ता
तिरिक्तसत्ताराहित्यं स्फुटं स्पष्टं यथा स्यात्तथा हि इति प्रसिद्धमुच्यते॥४२॥न देवाह चैतन्यस्येति॥चैतन्यस्य सर्वभूत

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भौतिकप्रपंचाधिष्ठानप्रकाशकस्यघटःप्रकाशतेपटःप्रकाशतेइत्यादिषेकरूपत्वादेकाकारत्वाद्धेतोःकर्हि
चित्कस्यांचिदवस्थायामपिभेदोनयुक्तोनयथार्थइत्यर्थः॥तर्हिजीवभेदःसत्यःस्यादित्यतआह॥जीवत्वंचेति
जीवत्वंचकारोप्यर्थः॥मृषामिथ्याज्ञेयं॥तदुपाधेरेवांतःकरणादेर्मायामयत्वादित्यर्थः॥अधिष्ठानसत्यत्वे
नकल्पितमिथ्यात्वबोधेदृष्टांतमाह॥यथारज्जौतदज्ञानात्वक्रतादिसादृश्येनमंदांधकारेसर्पग्रहणाबुद्धि
रज्जुसत्त्वस्यभवति॥तथैवात्मन्यात्माज्ञानात्प्रकाशसादृश्यादविशेषप्रकाशेचिज्जडग्रंथिरूपचिदाभासभ्र

जीवत्वंचमृषाज्ञेयंरज्जौसर्पग्रहोयथा॥४३॥रज्ज्वज्ञानात्क्षणेनैवयद्वद्रज्जुर्हिसर्पिणी॥भातितद्व
च्चितिःसाक्षाद्विश्वाकारेणकेवला॥४४॥उपादानंप्रपंचस्यब्रह्मणोन्यन्नविद्यते॥तस्मात्सर्वप्रपंचो
यंब्रह्मैवास्तिनचेतरत॥४५॥

माभवतीतिवेदांतसिद्धांतरहस्यं॥४३॥इदानींपूर्वोक्तमेवदृष्टांतंविवृण्वन्
सर्वस्यापिप्रपंचस्यब्रह्मरूपतामाह॥रज्ज्वेति॥केवलेतिविशेषणेनपूर्वावस्थामपरित्यज्यावस्थांतरप्राप्तिलक्ष
णविवर्त्तोपादानत्वमेवोक्तंनारंभोपादानत्वंनापिपरिणामोपादानत्वमितिबोध्यं॥अन्यत्स्पष्टं॥४४॥अत्रहेतून्दर्श
यन्पूर्वोक्तमुपसंहरति॥उपादानमिति॥यस्मात्प्रपंचस्याकाशादिदेहांतस्यजगद्विस्तारस्यब्रह्मणोमायाशबलात्



For Private and Personal Use Only

चैतन्यादन्यस्य रमाणवो यद्वा प्रकृतिरुपादानंकारणं विशेषेण विद्यत इति॥ तस्माद्वा एतस्मादात्मन आकाशः
संभूत इत्यादिश्रुतेः॥ तस्माद्धेतोरित्यादि स्पष्टमन्यत्॥४५॥ ननु व्याप्यव्यापकतारूपे भेदे जाग्रति सति कथं प्रपंच
स्य ब्रह्मतेत्याशंक्याह॥ व्याप्यमंतरं व्यापकं बाह्यं तयोर्भावो मिथ्या घटाकाशादिवत्कल्पितत्वादसत्य इत्यर्थः॥ त
त्र प्रमाणमाह॥ इदं ब्रह्मेदं क्षत्रमिति प्रकृत्येदं सर्वं यदयमात्मेत्यादिश्रुतिरूपेश्वराज्ञाबलादित्यर्थः॥ ततः किमत

व्याप्यव्यापकता मिथ्या सर्वमात्मेति शासनात्॥ इति ज्ञाते परे तत्त्वे भेदस्यावसरः कुतः॥४६॥ श्रुत्या
निवारितं नूनं नानात्वं स्वमुखेन हि॥ कथं भासो भवेदन्यः स्थिते चाद्वयकारणे॥४७॥ दोषोपि
विहितः श्रुत्या मृत्योर्मृत्युं स गच्छति॥

आह॥ इति ज्ञात इत्यादि सुगमं॥४६॥ ननु प्रत्यक्षेण भासमानो
व्याप्यव्यापकभावः कथं मिथ्येत्याशंक्याह॥ श्रुत्येति॥ नूनमिति निश्चये॥ हीति प्रसिद्धौ॥ श्रुत्या नेह नानास्ति
किंचनेत्यादिरूपयेत्यर्थः नानात्वं निवारितं॥ तेन च नानात्वनिवारणेनाद्वयेकारणे अभिन्नोपादाने ब्रह्मणि
स्थिते सति भासो व्याप्यव्यापकत्वादिप्रतिभासः कार्यभूतोन्यः स्वकारणातिरिक्तः कथं भवेन्न कथंचिदित्यर्थः॥
४७॥ किंच भेददृष्टेर्दोषश्रवणादपि कारणानन्यमेव कार्यमित्याह॥ दोष इति॥ मृत्योः स मृत्युमाप्नोति य इह नानेव प

तत्रमृत्योरनंतरंमृत्युंजन्ममरणपरंपरामित्यर्थः॥स्पष्टमन्यत्॥४८॥तर्हिकिंकुर्यादित्याह॥ब्रह्मणइति॥ब्रह्म
त्वादपरिच्छिन्नत्वात्परमात्मनःजायंतेइत्युत्पत्तिःस्थितिप्रलययोरुपलक्षणं॥यतोवेत्यादिश्रुतेः॥यस्मादेवंत
स्माद्धेतोरेतानिभूतानिब्रह्मैवभवंतितन्मात्रब्रह्मरूपाणीत्यवधारयेन्निश्चिनुयादिति॥४९॥ननुनानानामरू
पकर्मभेदेनविचित्राणिभूतानिकथमेकब्रह्मात्मकानिइत्याशंक्याह॥ब्रह्मैवेति॥त्रयंवाइदंनामरूपंकर्मेति

इहपश्यतिनानात्वंमाययावंचितोनरः॥४८॥ब्रह्मणःसर्वभूतानिजायंतेपरमात्मनः॥तस्मादेता
निब्रह्मैवभवंतीत्यवधारयेत्॥४९॥ब्रह्मैवसर्वंनामानिरूपाणिविविधानिच॥कर्माण्यपिसम
ग्राणिबिभर्तीतिश्रुतिर्जगौ॥५०॥सुवर्णाज्जायमानस्यसुवर्णत्वंचशाश्वतं॥

बृहदारण्यकश्रुतिरिति
जगौगायति॥स्वाधिकारिणःश्रावयामासेत्यर्थः॥इतिकिमतआह॥ब्रह्मैवसर्वनामान्याकाशादिदेहांतान्
संज्ञाविशेषान्॥चपुनर्विविधानिरूपाण्यवकाशादिद्विपदांतान्नानाकारविशेषान्॥अपिशब्दश्चार्थे॥
रूपग्रहणंगंधादिग्रहणस्याप्युपलक्षणं॥समग्राणिकर्माण्यवकाशप्रदानादीनिकर्माणिस्नानशौचांतान् राम॰
क्रियाविशेषान्बिभर्ति॥रज्ज्वादिकमिवसर्पादिप्रतिभासंदधात्यधिष्ठानदर्शनशून्यान्प्रतिदर्शयतीत्यर्थः॥५० १३

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत्रलोकप्रसिद्धदृष्टांतमाह सुगमं॥५१॥एवंकर्तृकर्मादिकारकषट्कस्याप्येकाधिष्ठानरूपत्वेसिद्धेपिभे
ददर्शिनोभयमाह॥स्वल्पेति॥स्वल्पमप्यंतरमुपास्योपासकरूपंभेदंकृत्वाकल्पयित्वायस्तिष्ठतितस्यभयं
भाषितं॥यदाह्येवैषएतस्मिन्नुदरमंतरंकुरुतेअथतस्यभयंभवतीत्यादिश्रुतेः॥५२॥ननुप्रकाशतमसो
रिवपरस्परविरुद्धस्वभावयोर्द्वैताद्वैतयोःकुतएकाधिकरणत्वमित्याशंक्यावस्थाभेदादित्याह॥यत्रेति॥यत्र

ब्रह्मणोजायमानस्यब्रह्मत्वंचनतथाभवेत्॥५१॥स्वल्पमप्यंतरंकृत्वाजीवात्मपरमात्मनोः॥यःसंति
ष्ठतिमूढात्माभयंतस्याभिभाषितं॥५२॥यत्राज्ञानाद्भवेद्द्वैतमितरस्तत्रपश्यति॥आत्मत्वेनयदासर्वं
नेतरस्तत्रचाण्वपि॥५३॥यस्मिन्सर्वाणिभूतानिह्यात्मत्वेनविजानतः॥

यस्यामज्ञानावस्थायांइतरो
न्योज्ञानेनद्वैतमिवभवेत्तत्रतस्यामज्ञानावस्थायांइतरोन्योन्यंपश्यति॥चशब्दःपूर्वोक्तवैलक्षण्यंसूचयति॥यदा
यस्मिन्ज्ञानकालेसर्वमात्मत्वेनैवभवेत् तत्रतस्मिन्ज्ञानकालेइतराण्यपिकिंचिदप्यन्यन्नपश्यति॥सकार्याज्ञा
ननिवृत्तेरितिभावः॥५३॥ननुद्वैतादर्शनेकःपुरुषार्थइत्याशंक्यश्रुतिमर्थतःपठति॥यस्मिन्अवस्थाविशेषे
सर्वाणिभूतान्यात्मत्वेनात्मभावेनविजानतःअपरोक्षेणसाक्षात्कुर्वताधिकारिणःपुरुषस्यतस्येतिषष्ठीसप्तम्यर्थे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अ॰नु॰ तस्मिनवस्थाविशेषेवैनिश्चयेनमोहोभ्रमोनभवेच्चपुनः शोकोव्याकुलतापिनभवेत्॥उभयत्रहेतुः॥अद्वितीयतः टी॰
१४ तत्कारणाभावादित्यर्थः॥५४॥शोककारणाभावेप्रमाणमाह॥सवायमात्माब्रह्मविज्ञानमयइत्यादिरूपयेत्यर्थः॥शे
षंस्पष्टं॥५५॥नन्वस्मिन्लोकएवतत्कारणेसतिकथंशोकाद्यभावउच्यतइत्याशंक्यसदृष्टांतमाह॥स्पष्टं॥५६॥दृ
ष्टांतंविवृण्वन्नुक्तन्यायमन्यत्राप्यतिदिशति॥त्रयमिति॥अलीको मिथ्या॥दृयंस्वप्नजागरणेलयेसुषुप्तौशेषंस्पष्टं

नवैतस्यभवेन्मोहोनचशोकोऽद्वितीयतः॥५४॥अयमात्माहिब्रह्मैवसर्वात्मकतयास्थितः॥इतिनि
र्धारितंश्रुत्याबृहदारण्यसंस्थया॥५५॥अनुभूतोप्ययंलोकोव्यवहारक्षमोपिसन्॥असद्रूपोयथास्व
प्नउत्तरक्षणबाधतः॥५६॥स्वप्नेजागरणेलोकःस्वप्नेपिजागरोनहि॥दूयमेवलयेनास्तिलयोपिह्यु
भयोर्नच॥५७॥त्रयमेवभवेन्मिथ्यागुणत्रयविनिर्मितं॥ ॥५७॥उक्तमुपसंहारफलितमाह॥अनुभूतइति

॥यत्रहिद्वैतमिवभवतितदितरइतरंपश्यतितदितरइतरंशृणोतितदितरइतरंविजानातीति॥१॥यत्रत्वस्यसर्व
मात्मैवाभूत्तत्केनकंपश्येत्तत्केनकंशृणुयादितिश्रुतेः॥२॥श्रुत्यंतरमपि॥यत्रवाअन्यदिवस्यात्तत्रान्योन्यपश्येद राम:
न्योन्यज्जिघ्रेदन्योन्यद्रसयेदित्यादिश्रुतेः॥३॥त्रयंजाग्रदाद्यवस्थात्रयमेवमुक्तपरस्परव्यभिचारेणमिथ्याभि १४

गुणत्रयविनिर्मितंमायाकल्पितमित्यर्थः॥तर्हिकिंसत्यमतआह॥अस्यावस्थात्रयस्येतिशेषंस्पष्टं॥५८॥न
न्ववस्थात्रयंमिथ्याभवतुजीवस्तुसत्यइत्यतः सदृष्टांतमाह॥यद्वदिति॥ब्रह्मणिवीक्ष्यमाणेआत्मत्वेनसाक्षा
त्कृतेसतिजीवत्वंनपश्यतीत्यन्वयः॥दृष्टांतस्तुस्पष्टएव॥५९॥अज्ञानावस्थायांप्रतीयमानोयोजीवब्रह्मभेदःस
नाममात्रइतिबहुदृष्टांतैराह॥रजतस्यख्यातिराख्यानामेतियावत्॥परेपरेब्रह्मणिजीवशब्दस्तथाशेषंस्पष्टं

अस्पृष्टागुणातीतोनित्योह्येकश्चिदात्मकः॥५८॥यद्वन्मृदिघटभ्रांतिःशुक्तौवारजतस्थितिः॥तद्व
द्ब्रह्मणिजीवत्वंवीक्ष्यमाणेनपश्यति॥५९॥यथामृदिघटोनामकनकेकुंडलाभिधा॥शुक्तौहिरजत
ख्यातिर्जीवशब्दस्तथापरे॥६०॥यथैवव्योम्निनीलत्वंयथानीरंमरुस्थले॥पुरुषत्वंयथास्थाणौतद्वद्वि ॥ ३६ ॥
श्वंचिदात्मनि॥६१॥यथैवशून्येवेतालोगंधर्वाणांपुरंयथा॥यथाकाशेद्विचंद्रत्वंतद्वत्सत्येजगत्स्थितिः

॥६०॥नकेवलंजीवएवनाममात्रःकिंतुसर्वंविश्वमपिब्रह्मणिनाममात्रमित्यनेकदृष्टांतैराह॥स्पष्टं॥नाममात्रप्रपंचस्य
मिथ्यात्ववासनादार्ढ्यायइममेवार्थंबहुभिर्लोकदृष्टांतैःप्रपंचयति॥यथैवशून्यइत्यादित्रिभिःशून्येनिर्जनेदेशेवेताले
अकस्मादाभासमानोभूतविशेषःगंधर्वपुरस्यापिशून्याधिष्ठानत्वंगंधर्वनगरंनामराजनगराकारोनीलपीतादिमे

सुगमं॥अपिच॥६३॥तत्रपादत्रयंस्पष्टं॥ननुकिमनेनमिथ्यात्ववासनादार्ढ्येनातआह॥तदभावतोनानाभावत
त्वद्ब्रह्मज्ञेयं॥वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमित्यादिश्रुतेः॥६४॥ननुयत्रहिद्वैतमिवभवती
त्यादिश्रुत्यर्थदर्शनेनावस्थात्रयविदेहमोक्षावुक्तौनतुजीवन्मोक्षइत्याशंक्याह॥किंच॥सर्वोपीति॥सर्वोपि

यथातरंगकल्लोलैर्जलमेवस्फुरत्यलं॥पात्ररूपेणताम्रंहिब्रह्मांडौघैस्तथात्मना॥६३॥घटना
म्नायथापृथ्वीपटनाम्नाहितंतवः॥जगन्नाम्नाचिदाभातिज्ञेयंतत्तदभावतः॥६४॥सर्वोपिव्य
वहारस्तुब्रह्मणाक्रियतेजनैः॥अज्ञानान्नविजानंतिमृदेवहिघटादिकं॥६५॥कार्यकारणतानि
त्यमास्तेघटमृदोर्यथा॥तथैवश्रुतियुक्तिभ्यांप्रपंचब्रह्मणोरिह॥६६॥गृह्यमाणेघटेयद्वन्मृत्ति
काभातिवैबलात्॥वीक्षमाणेप्रपंचेपिब्रह्मैवाभातिभासुरं॥६७॥ लौकिकोवैदिकश्चेति॥शेषंस्पष्टं॥

अत्रायंभावः॥अज्ञाननिवृत्तिरेवजीवन्मुक्तिर्नतुद्वैतादर्शनमिति॥६५॥तत्रहेतुंसदृष्टांतमाह॥यथासोम्यैकेनमृ
त्पिंडेनसर्वंमृन्मयंविज्ञातंस्यादित्यादिश्रुतिः॥युक्तिस्तुकार्यकारणयोरनन्यत्वेएककारणज्ञानात्सर्वकार्यज्ञानंनस्यादि
तिसुगममन्यत्॥६६॥कार्यकारणताअनन्यत्वमेवस्पष्टपतिगृह्यमाणेतिप्रमाणनिरपेक्षतयैवभासनशीलं॥स्पष्टम॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननुब्रह्मणिभासमानेप्रपंचोनभासेदित्याशंक्यावस्थाभेदेनोभयमपिभासतइतिसदृष्टांतमाह॥ सदेवेति॥
तत्रज्ञानिनः सदेवात्माविशुद्धोऽज्ञानतत्कार्यमलरहितस्तान्निष्प्रपंचोस्ति॥ अज्ञानिनस्तुसदेवाशुद्धोस्तिवेहि
तितत्प्रसिद्धो॥ उभयत्रापिदृष्टांतः यथेतितत्र ज्ञानिनः निर्विषयत्वेनाभयंकरीअज्ञानिनस्तुविपरीतत्वेनसर्परू
पिणीति॥ द्विविधार्थंभावः॥ ब्रह्मयद्यपिस्वयंप्रकाशत्वेनसदाभात्येवतथापिवृत्यारूढत्वेनपुरुषार्थोपयोगीति

सदेवात्माविशुद्धोस्तिह्यशुद्धोभातिवैसदा॥ यथैवद्विविधारज्जुर्ज्ञानिनोज्ञानिनोनिशं॥६८॥ य
थैवमृन्मयःकुंभस्तद्वद्देहोपिचिन्मयः॥ आत्मानात्मविभागोयंमुधैवक्रियतेबुधैः॥६९॥ सर्पत्वेनय
थारज्जुरजतत्वेनशुक्तिका॥ विनिर्णीताविमूढेनदेहत्वेनतथात्मता॥७०॥ घटत्वेनयथापृथ्वीपट
त्वेनैवतंतवः॥ विनिर्णीता॥७१॥ कनकंकुंडलत्वेनतरंगत्वेनवैजलं॥ विनिर्णीता॥७२॥ ज्ञानिनंप्रति
नाज्ञानिनंसूर्यदीपादिरिवचसुषमदं धाविति दिक्॥६८॥ नन्वात्मायदिसदैवनिष्प्रपंचत्वेनभातितर्हिकिमर्थंदे
हात्मभेदोवर्णितइत्याशंक्याविवेकिनोदेहव्यतिरेकबोधार्थं॥ विवेकिनस्तुव्यर्थएवेतिसदृष्टांतमाह॥ यथेनि
तत्राबुधैरित्यकारप्रश्लेषमुधैवक्रियतेऽपितुनेतिकाकुव्याख्यानंअन्यत्सर्वंसुगमं॥६९॥७०॥७१॥ ७२॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥७२॥इदानीमविवेकिनःकल्पितदेहतादात्म्यंसदृष्टांतमाह॥सर्पत्वेति॥घटत्वेति॥कनकत्वेति॥पुरुषत्वेति॥
गृहत्वेति॥सर्पत्वेनेत्यादिपंचभिः॥एषांपंचानामपिश्लोकानामर्थःस्फुटतरएवास्तीतिनव्याख्यायते॥७४॥

पुरुषत्वेनयथास्थाणुर्जलत्वेनमरीचिका॥विनि॥७३॥गृहत्वेनैवकाष्ठानिखड्गत्वेनैवलोहता॥
विनिर्णीताविमूढेनदेहत्वेनतथात्मता॥७४॥यथावृक्षविपर्यासोजलाद्भवतिकस्यचित्॥तद्वदा
त्मनिदेहत्वंपश्यत्यज्ञानयोगतः॥७५॥पोतेनगच्छतःपुंसःसर्वंभातिविचंचलं॥तद्वदात्मनिदेह
त्वंपश्यत्यज्ञानयोगतः॥७६॥पीतत्वंहियथाशुभ्रेदोषाद्भवतिकस्यचित्॥तद्व॰॥७७॥चक्षुर्भ्यां
भ्रमशीलाभ्यांसर्वंभातिभ्रमात्मकं॥तद्वदा॰॥७८॥अलातभ्रमणेनैववर्तुलंभातिसूर्यवत्॥त
द्व॰॥७९॥महत्वेसर्ववस्तूनामणुत्वंह्यतिदूरतः॥तद्व॰॥८०॥सूक्ष्मत्वेसर्वभावानांस्थूलताचोपने
त्रतः॥तद्व॰॥८१॥काचभूमौजलत्वंवाजलेभूमौहिकाचता॥तद्व॰॥८२॥यद्वदग्नौमणित्वंहिमणौ
वावह्नितापुमान्॥तद्व॰॥८३॥ नन्वन्यथानिर्णयेकिंकारणमितितदज्ञानमेवेतिसदृष्टांतमाह॥यथावृक्षेत्या
दिद्वादशभिः॥७५॥नात्रपोतेननौकया॥स्पष्टमन्यत्॥७६॥७७॥७८॥७९॥८०॥हीतिसर्वलोकप्रसिद्धौ॥अतएव



For Private and Personal Use Only

॥८४॥८५॥शशीत्युपलक्षणंसूर्यादीनामपिशेषंस्पष्टं॥एवंद्वादशश्लोकोक्तमर्थमुपसंहरति॥८६॥एवमुक्तेन
प्रकारेणात्मन्यविज्ञातःआत्माज्ञानातदेहाध्यासोमनुष्योहमित्यादिबुद्धिर्जायतेभवति॥हीतिप्रसिद्धं॥नन्वे
तस्यनिवृत्तिःकुतोभवेदितिचेदात्मज्ञानादेवेत्याहोत्तरार्द्धेन॥सएवदेहाध्यासएवात्मपरिज्ञानातब्रह्मात्मैक्य
साक्षात्कारादात्मन्यज्ञानतत्कार्यरहितेप्रत्यगभिन्नेब्रह्मणिलीयतेब्रह्मस्वरूपेणावतिष्ठते॥नह्यधिष्ठानंविना

अभ्रेषुसत्सुधावत्सुसोमोधावतिभातिवै॥तद्व०॥८४॥यथैवदिग्विपर्यासोमोहाद्भवतिकस्यचित
॥तद्व०॥८५॥यथाशशीजलेभातिचंचलत्वेनकस्यचित॥तद्वदात्मनिदेहत्वं०॥८६॥एवमात्मन्य
विज्ञातोदेहाध्यासोहिजायते॥सएवात्मपरिज्ञानाल्लीयतेचपरात्मनि॥८७॥सर्वमात्मतया
ज्ञातंजगत्स्थावरजंगमं॥अभावात्सर्वभावानांदेहेताचात्मताकुतः॥८८॥आत्मानंसततंजानन
कालंनयमहाद्युते॥ रोपितस्यस्वरूपमस्तिचकाराद्ध्यासकारणमज्ञानमपिलीयतइति॥अन्यथाध्यासल
याभावादित्यर्थः॥नहिकारणेसतिकार्यस्यलयःसंभवति॥तस्मादात्मज्ञानादेवसकारणकार्याध्यासनिवृत्तिरित्यलं
पल्लवितेन॥८७॥एतदेवविवृणोतिसर्वमिति॥आत्मतादेहस्येत्यर्थः॥स्पष्टमन्यत॥८८॥ननुज्ञानिनोनिष्प्रपंचा
देहानांचा४

सटीकात्मबोधः

गू॰नि॰२



नह्यन्यभोजनेनान्यस्तृप्यतीतिचेदत आह॥आत्मानमिति॥भोमहाद्युतेकामादिपराभवेनस्वहितसाधनोन्मुख
स्त्वंआत्मानंसततंसुषुप्तिपर्यंतंजानन्वेदांतवाक्यैर्विचारयन्कालंनयातिक्रमस्वविचारसाध्यज्ञानानंतरंचाखिलं
प्रारब्धंचरमदेहारंभकंकर्मभुंजनसुखदुःखाभासानुभवेनक्षपयन्समुद्वेगंकर्तुंनार्हसीति॥८९॥वस्तुतस्तु
प्रारब्धमेवनास्तिकुतोभोगःकुतस्तरामुद्वेगकारणंकुतस्त्वमातन्निषेधोपदेशइतिवेदांतसिद्धांतरहस्यंवक्तुं
प्रतिजानतआचार्याः॥अत्रेयंप्रक्रिया॥जगत्प्रतीतिस्त्रिधालौकिकीशास्त्रियानुभविकीचेति॥तत्राद्यायारमा

प्रारब्धमखिलंभुंजन्नोद्वेगंकर्तुमर्हसि॥८९॥उत्पन्नेध्यात्मविज्ञानेप्रारब्धंनैवमुंचति॥इतियत्क
यतेशास्त्रेतन्निराक्रियतेधुना॥९०॥तत्त्वज्ञानोदयादूर्ध्वंप्रारब्धंनैवविद्यते॥देहादीनामसत्त्वात्तु
यथास्वप्नोविबोधतः॥९१॥कर्मजन्मांतरीयंयत्प्रारब्धमितिकीर्तितं॥

र्थिकीद्वितीयाव्यावहारिकीतृतीया
तुप्रातिभासिकीतासांनिवृत्तिस्तुक्रमाद्वेदांतश्रवणादिनयसाक्षात्कारप्रारब्धक्षयैर्भवतिनान्यथेति॥तत्रेयंप्रति
ज्ञांत्यक्तप्रतीत्यभिप्रायेणेतिज्ञातव्यं॥श्लोकार्थस्तुस्पष्टएव॥९०॥तदेवाह॥तत्त्वेति॥ज्ञानेनसर्वव्यवहारकार
णाज्ञाननिवृत्तेःप्रारब्धाभावइतिश्लोकार्थः॥पदार्थस्तुस्फुटएव॥९१॥इदानींप्रारब्धशब्दव्युत्पादयनुक्तमुप

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संचितक्रियमाणप्रारब्धभेदात् तन्मध्ये भाविदेहारंभकं संचितं ॥ तथा वर्तमानदेहनिर्वर्त्यं क्रियमाणं प्रारब्धं
तु वर्तमानदेहारंभकं ॥ तत्र यद्यपि संचितं जन्मांतरीयमेव ॥ तथापि भाविदेहस्यापि प्रारब्धमेव भवति ॥ तेने
दं सिद्धमात्मनः स्वतः कर्तृत्वाभावात्कालत्रयेपि जन्म नास्तीति सर्वमवदातं ॥ १२ ॥ पूर्वोक्तं दृष्टांतं विवृण्वन् स
कारणजन्माभावे युक्तिमाह ॥ स्वप्नेति ॥ स्पष्टं ॥ १३ ॥ ननु देहादिप्रपंचस्य यतो वेत्यादिश्रुतेः ॥ सत्यब्रह्मजत्वात्क
थं प्रतिभासत्वमिति चेदुच्यते ॥ अत्र कारणं द्विविधं निमित्तोपादानभेदात् ॥ तत्र निमित्तं नामोत्पत्तिमात्रकार

तत्तु जन्मांतराभावात्संसारो नैवास्ति कर्हिचित् ॥ १२ ॥ स्वप्नदेहो यथाध्यस्तस्तथैवायं हि देहकः ॥ अ
ध्यस्तस्य कुतो जन्म जन्माभावे स्थितिः कुतः ॥ १३ ॥ उपादानं प्रपंचस्य मृद्भांडस्येव कथ्यते ॥

णं ॥ उपादानं तु उत्पत्तिस्थितिलयकारणं तत्र वेदांतैः ॥ मायां तु प्रकृतिं विद्यादित्यादिभिः प्रपंचस्योपादानमज्ञानं प
ठ्यते ॥ चकाराद्ब्रह्मापि ॥ अत्रायं भावः ॥ न केवलं तत्र ब्रह्मैव जगत्कारणं निर्विकारत्वात् नापि केवलमज्ञानं जडत्वात् ॥ त
स्मादुभयं मिलित्वैव जगत्कारणं भवतीति ॥ सत्यानृते मिथुनीकरोतीत्यादिश्रुतेः ॥ तत्र दृष्टांतः ॥ भांडस्य घटकरकादेर्मृदि
व मृत्पिंड इव तत्र जलस्थाने ब्रह्म पिंडीकरणसामर्थ्यसाम्यात् अज्ञानं तु मृत्तिकास्थाने आवरकत्वसाम्यात् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अ॰नु॰ तत्रब्रह्मणोअविनाशित्वाद्ब्रह्मज्ञानेनतस्मिन्ज्ञानएवनष्टेसतिविश्वताजीववज्जगदीश्वरात्मकजगद्भावःकनकाप्य
१८ ल्लोसर्पः॥२४॥मिथ्यैवभावस्यैवजगत्कारणतांसदृष्टांतंप्रपंचयतिस्पष्टं॥२५॥इदानींपदुक्तंतस्मिन्नष्टेकविश्वते
तितत्प्रपंचयन्पूर्वोक्तंप्रारब्धाभावंसदृष्टांतमुपसंहरतिसार्द्धेन॥रज्जुरूपइति॥स्पष्टं॥२६॥एतदप्युक्तानार्थः॥ननुजी
वन्मुक्तस्यन्यथानुपपत्त्याब्रह्मसमश्नुतइत्यादिश्रुतिः॥प्रारब्धंकिमर्थंवक्तिइतिचेदुच्यते॥अर्द्धेनअज्ञानेति॥अ

अज्ञानंचेतिवेदांतैस्तस्मिन्नष्टेकविश्वता॥२४॥यथारज्जुंपरित्यज्यसर्पंगृह्णातिवैभ्रमात्॥तद्वत्सत्य
मविज्ञायजगत्पश्यतिमूढधीः॥२५॥रज्जुरूपेपरिज्ञातेसर्पखंडंनतिष्ठति॥अधिष्ठानेतथाज्ञाते
प्रपंचेशून्यतांगते॥२६॥देहस्यापिप्रपंचत्वात्प्रारब्धावस्थितिःकुतः॥अज्ञानजनबोधार्थंप्रारब्धंवक्ति
वैश्रुतिः॥२७॥क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे॥

ज्ञानिजनबोधार्थंप्रारब्धंवक्तीति॥ज्ञानेनसर्व
व्यवहारकारणेऽज्ञानेनष्टेसतिज्ञानिनःकथंव्यवहारइत्यज्ञानिभिराक्षिप्तेप्रारब्धादितितद्बोधार्थमितिशेषंस्पष्टं
॥२७॥किंतर्हिज्ञानिबोधार्थंवक्तिश्रुतिरितिचेदुच्यते॥क्षीयंतेति॥भिद्यतेहृदयग्रंथिरित्यादिश्रुत्याकर्माणीतिब रामः
हुत्वंयत्स्फुटंगीतंतन्निषेधार्थंप्रारब्धाभावप्रतिपादनार्थंअन्यथासंचितक्रियमाणापेक्षयाकर्मणीतिद्वित्वमगा १८

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्येतद्ब्रह्मात्मसाक्षात्काराच्चिज्जडग्रंथिभेदात्संचितक्रियमाणप्रारब्धाख्यंत्रिविधकर्मक्षयांतंपरमपुरुषार्थं ज्ञानिबोधार्थंश्रुतिर्वक्तीतिभावः॥१८॥उक्तेवेपरीत्येबाधकमाह॥उच्यतइति॥एतत्प्रारब्धमज्ञैःश्रुतितात्पर्यानभिज्ञैःबलादविवेकसामर्थ्याच्चेदुच्यतेयथार्थतयाप्रतिपाद्यते॥चकारान्ननश्यतीतितदानर्थद्वयागमो दोषद्वयप्राप्तिः॥तत्रानिर्मोक्षप्रसंगएकोदोषःद्वितीयस्तुज्ञानसंप्रदायोच्छेदकइति॥नकेवलंदोषद्वयंएतस्या पिरपितुवेदांतमतहानंद्वैतयाथार्थ्यादित्यर्थः॥तर्हिकिंप्रतिपत्तव्यमित्यतआह॥यतइति॥यतोयस्याःसकाशा

बहुत्वंतन्निषेधार्थंश्रुत्यागीतंचयत्स्फुटं॥१८॥उच्यतेज्ञैर्बलाच्चेत्तत्तदानर्थद्वयागमः॥वेदांतमत हानंचयतोज्ञानमितिश्रुतिः॥१९॥

ज्ज्ञानंभवतीतितादृशीसेत्यर्थः॥श्रुतिर्ग्राह्येतिशेषः॥साश्रुतिस्तु॥तमेवधीरोविज्ञायप्रज्ञांकुर्वीतब्राह्मणः॥नानुध्यायाद्बहून्शब्दान्वाचोविग्लापनंहितत्॥इत्यादि॥एतदभिप्रायःकइतिचेल्लिख्यतेधीरोविवेकीब्राह्मणोब्रह्मभवितुमिच्छुस्तमेववेदांतप्रसिद्धमात्मानंविज्ञायादौपरोक्षतोज्ञात्वानंतरंप्रज्ञामपरोक्षानुभवपर्यंतंवेदांतवाक्यविचारंकुर्वीतबहून्कर्मोपासनाप्रतिपादकान्शब्दान् वाक्यसंदर्भान्नानुध्यायान्नचिंतयेत्॥तर्हितान्ब्रूयात्किंनेत्याह॥वाचोविग्लापनंग्लानिंकरोति॥द्वैतशास्त्रपाठ



For Private and Personal Use Only

नदेवमेतावतागं्रथसंदर्भेण मुख्याधिकारिणो वैराग्यादिसाधनचतुष्टयपूर्वकं वेदांतवाक्यविचार एव प्रत्यगभि
न्नब्रह्मापरोक्षज्ञानद्वारा मुख्यं मोक्षकारणमित्यभिहितं॥ इदानीमसकृद्विचार्यापि बुद्धिमांद्यविषयासक्त्यादि
प्रतिबंधेनापरोक्षज्ञानं यस्य न जायते तस्य मंदाधिकारिणो निर्गुणब्रह्मोपासनमेव मुख्यं साधनमित्यभिप्रेत्य स
साधनं ध्यानयोगं प्रतिजानत आचार्याः॥ त्रिपंचेति॥ अथोशब्दोऽधिकारभेदार्थः॥ क्वचिद्तद्इतिपाठस्तस्मिन्प
क्षे यतो मंदाधिकारी विचारं न लभतेऽतो हेतोरित्यर्थः॥ त्रिपंच त्रिगुणितानि पंच पंचदशेत्यर्थः॥ अनेनाष्टांगयो

त्रिपंचांगान्यथो वक्ष्ये पूर्वोक्तस्य हि लब्धये॥ तैश्च सर्वैः सदा कार्यं निदिध्यासनमेव तु॥१००॥ नि
त्याभ्यासादृते प्राप्तिर्न भवेत्सच्चिदात्मनः॥ गप्रतिपादकं पातंजलमवैदिकत्वाद्वैशेषिकादिवदनादे

यमिति ध्वनितं॥ तत्संख्याकानि अंगानि॥ निदिध्यासनांगिसाधकसाधनविशेषान् प्रयाजादिवदित्यर्थः॥
वक्ष्ये इति निदिध्यासनप्रतिज्ञाप्रयोजनमाह॥ पूर्वोक्तस्येति पूर्वोक्तस्य स्वरूपावस्थानलक्षणमोक्षस्य सि
द्धय इति॥ हीति वेदांतप्रसिद्धा॥ तु शब्दः पातंजलवैलक्षण्येन लक्षणेन मोक्षस्य सिद्धये इति॥ सुगममन्यत्॥ रामः
॥१००॥ मंदाधिकारिणान्यत्सर्वं कर्म सगुणोपासनविचाररूपं साधनं विहाय श्रद्धयाचार्योक्तप्रकारेण निर्गु १९

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णब्रह्मैवनिदिध्यासेदित्याह॥नित्येतिस्पष्टं॥१॥ननुकानितान्यंगानियैःसहनिदिध्यासनंकर्त्तव्यमित्यपेक्षायांता
न्युद्दिशतियमइत्यादिद्वाभ्यां॥उत्तानार्थावुभावपिश्लोकौ॥१०३॥इदानीमेतेषांप्रत्येकमुद्देशक्रमेणस्वाभिमता
निलक्षणान्याह॥सर्वमित्याद्येकविंशतिभिः॥सर्वमाकाशादिदेहांतंजगद्ब्रह्मबाधासामानाधिकरण्यद्वारास्था
णुपुरुषादिवदित्यर्थः॥इतिविज्ञानान्निश्चयाद्धेतोरिंद्रियाणांश्रोत्रादीनामेकादशकरणानांग्रामःसमूहस्तस्य

तस्माद्ब्रह्मनिदिध्यासेज्जिज्ञासुःश्रेयसेचिरं॥१॥यमोहिनियमस्त्यागोमौनंदेशश्चकालता॥आसनंमू
लबंधश्चदेहसाम्यंचदृक्स्थितिः॥२॥प्राणसंयमनंचैवप्रत्याहारश्चधारणा॥आत्मध्यानंसमाधिश्च
प्रोक्तान्यंगानिवैक्रमात्॥३॥सर्वंब्रह्मेतिविज्ञानादिंद्रियग्रामसंयमः॥यमोयमितिसंप्रोक्तोऽभ्यसनीयो
मुहुर्मुहुः॥४॥सजातीयप्रवाहश्चविजातीयतिरस्कृतिः॥

संयमः॥सम्यक्शब्दादिविषयाणांविनाशित्वसा
तिशयत्वादिदोषदर्शनात्सम्यक्त्वमित्यर्थः॥यमोविषयेभ्योनिवारणं॥अयंयमइतिसंप्रोक्तः॥नतुकेवलमहिंसादि
रित्यर्थः॥ततश्चकिमित्यतआह॥अयंमुहुर्मुहुरभ्यसनीयइति॥४॥एवंयमंलक्षयित्वानियमंलक्षयति॥सजातीय
प्रवाहस्त्वनवच्छिन्नब्रह्मतदेकाकारोवृत्तिप्रवाहः॥चकाराद्विजातीयतिरस्कृतिर्विजातीयंब्रह्मात्मविलक्षणंजगत्पूर्वं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संस्काराज्जायमानात्तदातदाकारवृत्तिरित्यर्थः तस्यतिरस्कृतिर्दोषस्मृत्याधिक्कारउपेक्षानादरइत्यर्थः॥अयंनिय
मइत्यर्थः॥नतुकेवलंशौचादिरित्यर्थः॥ह्यौस्युपनिषत्प्रसिद्धौ॥नन्वनयोरुपनिषत्प्रसिध्याकःपुरुषार्थइतिचेदा
ह॥परानंदइति॥ततश्चकिमतआह॥नियमादित्यादिसुगमं॥५॥इदानींतृतीयंत्यागंलक्षयति॥त्यागइतिप्रपंच
रूपस्यप्रपंचोनामरूपलक्षणोरूप्यतेघटोयंपटोयमित्यादिनामरूपतोनिरूप्यतेव्यवह्रीयतेप्रकाश्यत
इत्यर्थः॥येनतत्प्रपंचरूपंसर्वाधिष्ठानभूतंपदार्थस्फुरणंतस्यचिदात्मत्वावलोकनात् चित्अजडंस्वतए

नियमोहिपरानंदोनियमात्क्रियतेबुधैः॥५॥त्यागःप्रपंचरूपस्यचिदात्मत्वावलोकनात्॥त्यागो
हिमहतांपूज्यःसद्योमोक्षमयोयतः॥६॥

वप्रकाशमानंब्रह्मतदात्मस्वरूपंपश्यतद्भावस्तस्यावलोक
नमनुसंधानंतस्माद्धेतोर्यस्त्यागउपेक्षासएवत्यागस्त्यागशब्दवाच्यः॥ईशावास्यमिदंꣳसर्वमित्यादिश्रुतेः॥हो
तिविद्वदनुभवप्रसिद्धौ॥नन्वयंत्यागोनक्कत्रापिप्रसिद्धइत्याशंक्याह॥महतांपूज्यइतितत्रहेतुः॥यतोहेतोर
यंत्यागःसद्योनुसंधानकालएवमोक्षमयःपरमानंदस्वरूपावस्थानरूपः॥अतएवात्मतत्वविदामिष्टत्वादितिप्र
सिद्धोयंत्यागइत्यर्थः॥तस्मादयमेवमुमुक्षुणाकर्त्तव्योनान्यःकेवलंस्वकर्माद्यकरणरूपइतिभावः॥एवमग्रेपूर्ह्य



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ मौनं लक्षयति॥ यस्मादिति जातिक्रियादिप्रवृत्तिनिमित्ताभावात्॥ मनोवाचामगोचरमत एव मौनं तथापि
योगिप्रत्यक्षं यद्ब्रह्म तत्सर्वदा बुधो विवेकी भवेत्तदहमस्मीत्यनुसंदध्यादिति॥ ७॥ ८॥ ९॥ नन्विदं प्रत्यगभिन्न
ब्रह्मानुसंधानं ध्यानरूपं चतुर्दशमंगं प्रतीयते इत्यस्मात्सारस्यात्प्रकारांतरेण मौनमेव लक्षयति॥ सार्द्धेन॥ अयं
भावः॥ प्रवृत्तिनिमित्ताभावात् ब्रह्म यथावागविषयं तथा जात्यादिप्रपंचोपि सदसदादिविकल्पासहत्वाद्वाग्गती

यस्माद्वाचो निवर्त्तंते अप्राप्य मनसा सह॥ यन्मौनं योगिभिर्गम्यं तद्भवेत्सर्वदा बुधः॥ ७॥ वाचो यस्मा
न्निवर्तंते तद्वक्तुं केन शक्यते॥ प्रपंचो यदि वक्तव्यः सोपि शब्दविवर्जितः॥ ८॥ इति वा तद्भवेन्मौनं
सतां सहजसंज्ञितं॥ गिरा मौनं तु बालानां प्रयुक्तं ब्रह्मवादिभिः॥ ९॥ आदावंते च मध्ये च जनो यस्मि
न्न विद्यते॥ येनेदं सततं व्याप्तं स देशो विजनः स्मृतः॥ १०॥ कलनात्सर्वभूतानां ब्रह्मादीनां निमेषतः॥

न इति॥ विवादस्य गोचरो मौनं केषामित्याह॥ सतां चेदं प्रसिद्धमित्याह॥ सहजस्थितिनाम्ना प्रसिद्धमित्यर्थः॥ न
नु वाङ्नियमनमेव प्रसिद्धमिति चेत्तत्राह॥ अर्द्धेन॥ गिरेति इदानीं देशं लक्षयति॥ अत्र जनस्य त्रैकालिका
भावः अनुभाविकः सप्रतीत्या ज्ञेयः॥ न तु लौकिकशास्त्रीयप्रतीतिभ्यां विरोधादिति भावः॥ स्पष्टमन्यत्॥ १०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 अथकालंलक्षयति॥कलनादिति॥निमेषतआरभ्यकलनात्सर्गस्थितिप्रलयाधारत्वादित्यर्थः॥शेषंस्पष्टं॥ 
॥११॥आसनंलक्षयति॥ सुखेनेति॥यस्मिन्सुखेसुखरूपेब्रह्मणिचिंतनंकर्तव्याकर्तव्यचिंतानैवभवेत्तद्
ब्रह्मासनंविजानीयादित्यन्वयः॥कीदृशंब्रह्मअजस्रंकालत्रयावस्थायीत्यर्थः॥सुगममन्यत्॥१२॥प्रसंगादा
सनविशेषंलक्षयति॥सिद्धंचतदासनंचाथवासिद्धानामासनमितिकर्मधारयतत्पुरुषसमासाभ्यांब्रह्मेवेत्य

कालशब्देननिर्दिष्टोह्यखंडानंदअद्वयः॥११॥सुखेनैवभवेद्यस्मिन्नजस्रंब्रह्मचिंतनं॥आसनंतद्वि
जानीयान्नेतरत्सुखनाशनं॥१२॥सिद्धंयत्सर्वभूतादिविश्वाधिष्ठानमव्ययं॥यस्मिन्सिद्धाःसमावि
ष्टास्तद्वैसिद्धासनंविदुः॥१३॥यन्मूलंसर्वभूतानांयन्मूलंचित्तबंधनं॥मूलबंधःसदासेव्योयोग्योसौ
राजयोगिनां॥१४॥अंगानांसमतांविद्यात्समेब्रह्मणिलीयते॥

र्थः॥१३॥अथमूलबंधंलक्षयति॥यन्मूलमि
ति॥चित्तबंधनंचित्तबंधकारणंमूलज्ञानंयन्मूलंतदाश्रयभूतंपृथक्सत्ताशून्यत्वादित्यर्थः॥समूलबंधइत्यन्वयः
॥राजयोगिनांव्यवहारेष्वविक्षिप्तचित्ततालक्षणयोगश्रेष्ठवतांज्ञानपरिपाकयुक्तानामित्यर्थः॥शेषंस्पष्टं॥१४॥इदा
नींदेहसाम्यंलक्षयति॥अंगानामिति अंगानांब्रह्मण्यध्यस्तानांस्वभावविषमाणामधिष्ठानसमत्वदृष्ट्यासमतांविद्या 

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चेत्तमेब्रह्मणिअंगवैषम्यमित्यत्राध्याहारः॥तन्नोलीयतेसमंब्रह्मरूपतयानतिष्ठतिइत्यर्थः॥तर्हीत्यत्रशेषः॥शुष्कवृक्षवदृजुत्वंनैवभवेदितिसंबंधः॥अंगानांविषमस्वभावत्वादितिभावः॥१५॥इदानींदृक्स्थितिंलक्ष्यति॥दृष्टिमंतःकरणवृत्तिंज्ञानमयीमखंडब्रह्माकारामित्यर्थः॥फलव्याप्यत्वाभावेपिवृत्तिव्याप्यत्वादितिभावः॥स्पष्टमन्यत्॥१६॥ननुतथापिप्रवृत्तिनिमित्ताभावादिंद्रियाविषयब्रह्मरूपत्वेनप्रत्यक्षंजगतोदर्शनंकथंस्या

नोचेन्नैवसमानत्वमृजुत्वंशुष्कवृक्षवत्॥१५॥दृष्टिंज्ञानमयींकृत्वापश्येद्ब्रह्ममयंजगत्॥सादृष्टिः
परमोदारानननासाग्रविलोकिनी॥१६॥द्रष्टृदर्शनदृश्यानांविरामोयत्रवाभवेत्॥दृष्टिस्तत्रैवकर्त्त
व्यानननासाग्रविलोकिनी॥१७॥चित्तादिसर्वभावेषब्रह्मत्वेनैवभावनात्॥निरोधःसर्ववृत्तीनांप्रा
णायामःसउच्यते॥१८॥निषेधनंप्रपंचस्यरेचकाख्यःसमीरणः॥

दित्यस्वारस्यात्पक्षांतरेणाह॥वाश ब्दःपक्षांतरेदृष्टीत्यादिश्रोत्रादिसर्वत्रिपुटीनामुपलक्षणं॥ब्रह्मैवेदंसर्वमितीत्येवमात्रैकवृत्तिःकार्येतिभावः॥१७॥अथप्राणायामंलक्षयति॥चित्तादीति मनोधीनत्वात्प्राणस्यमनोनिरोधेनैवप्राणनिरोधः॥नतुप्राणनिरोधेनपातंजलाभिमतेनमनोनिरोधस्तदधीनत्वाभावादितिफलितार्थः॥१८॥अमुंप्राणायामंस्वामि

अ·नु· निषेधनमितिअनात्मोपेक्षात्मानुसंधानतद्दार्ढ्यानिरेचकादिशब्दवाच्यानीतिभावार्थः॥१९॥नन्वयंत्रिविधोपि टी·
२२ प्राणायामोनकुत्रापिश्रुतइत्यपेक्षायामत्राधिकारिणमाहार्द्धेन॥अयमुक्तलक्षणःप्राणायामः॥चकाराद्वेदत्र
प्रयुक्तइत्यर्थः॥प्रबुद्धानांप्रकर्षेणासंभावनादिरहितत्वेनबुद्धानामात्मबोधयुक्तानांनिःसंदेहापरोक्षज्ञानि
नामित्यर्थः॥योग्यःइत्यध्याहारःतत्रहेतुः॥अज्ञानामिति॥२०॥इदानींप्रत्याहारंलक्षयति॥विषयेष्विति॥

ब्रह्मैवास्मीतियावृत्तिःपूरकोवायुरीरितः॥१९॥ततःसद्वृत्तिनैश्चल्यंकुंभकःप्राणसंयमः॥अ
यंचापिप्रबुद्धानामज्ञानांघ्राणपीडणात्॥२०॥विषयेष्वात्मतांदृष्ट्वामनसश्चित्तमज्जनं॥प्रत्या
हारःसविज्ञेयोभ्यसनीयोमुमुक्षुभिः॥२१॥यत्रयत्रमनोयातिब्रह्मणस्तत्रदर्शनात्॥

विषयेषुघटादि
षुवाशब्दादिषुअन्वयव्यतिरेकाभ्यामात्मभावंसत्तास्फुरत्ताप्रियतामात्रंदृष्ट्वाऽनुसंधायतत्रेतिशेषः॥आत्मभावेन
मनसोंतःकरणस्यचित्तस्यमज्जनंनामरूपक्रियानुसंधानराहित्यंसःप्रत्याहारः॥ततःकिमतआह॥अभ्यस
नीयइति॥२१॥धारणांलक्षयति॥यत्रेति॥यत्रयत्रयस्मिन्यदार्थेमनोयातिगच्छतितत्रतत्रब्रह्मणःसत्तादिमा रामः
त्रस्यनामाद्युपेक्षयादर्शनादनुसंधानान्मनसोधारणं॥नन्वाधारादिषट्चक्रमध्येएकत्रमनसोधारणंप्रसिद्धमत २२

सोक्तलक्षणाधारणापरोत्कृष्टामताऽन्यातुपातंजलाभिमताप्राणायामादिवदपरेतिभावः॥ चएवेत्यव्ययद्वयं वेदांतविहदनुभवप्रसिद्धिंद्योतयति॥२२॥आत्मध्यानंलक्षयति॥ब्रह्मैवेति॥सद्वृत्त्या स तोऽप्रमाणांतरबाधायोग्यावृत्तिस्तयाकृतायानिरालंबतादेहाद्यनुसंधानराहित्यं॥तयास्थितिरवस्थानमित्यर्थः॥शेषंस्पष्टं॥२३॥अथांत्यसमाधिरूपंपंचदशममंगंलक्षयति॥निर्विकारतयाविषयानुसंधानरहिततयांतःकरणवृत्त्यापुनरंतरमेवब्रह्माकारतयावृत्त्यायत्सम्यक्संस्काररहितंध्यातृध्येयाकारवृत्तिशून्यत्वमित्यर्थः॥ वृत्तिविस्मरणंद्वैतानन्नुसंधानंसमाधिः॥पंचदशमंगमित्यर्थः॥ननुवृत्तिविस्मरणस्याज्ञानरूपत्वात्कथंसमाधित्वमतःसमाधिंविशिनष्टि॥ज्ञानसंज्ञकःब्रह्माकारमात्रतयास्फुरणादित्यर्थः॥२४॥ इदानींपदर्थसांगमिदंनिदिध्यासनमुक्तंतदाह॥अकृत्रिमानंदस्वरूपभूतानंदाभिव्यंजकनिदिध्यासनमित्यर्थः॥चकाराद्ययाबुद्धिवेदांतविचार

मनसोधारणंचैवधारणासापरामता॥२२॥ब्रह्मैवास्मीतिसद्वृत्त्यानिरालंबतयास्थितिः॥ध्यानशब्देनविख्यातापरमानंददायिनी॥२३॥निर्विकारतयावृत्त्याब्रह्माकारतयापुनः॥वृत्तिविस्मरणंसम्यक्समाधिर्ज्ञानसंज्ञिकः॥२४॥इमंचाकृत्रिमानंदंतावत्साधुःसमभ्यसेत्॥

अ॰नु॰ एवमभ्यस्यतः फलमाह॥ ततइति॥ साधननिर्मुक्तः साधनाभ्यासरहितइत्यर्थः॥ एतस्यतद्दांतप्रसिद्धंस्व टी॰
२३ रूपंब्रह्मैवेतिभावः॥२६॥ अयंसमाधिपर्यंतोयोगोमहाफलोपिसुकरइत्यनादरोनकार्यइत्याहद्वाभ्यां॥ स
माधाविति॥ स्पष्टोर्थः॥२७॥ लयइति॥ तत्रलयोनिद्रातमः कार्याकार्यविवेकः॥ विक्षेपोविषयस्फुरणं॥ र
सास्वादोधन्योहमित्याद्यानंदाकारवृत्तिः॥ चपुनः शून्यताकषायः चित्तदोषः रागद्वेषादितीव्रवासनयाचि

वश्योयावत्क्षणात्पुंसः प्रयुक्तः सन्भवेत्स्वयं॥२५॥ ततः साधननिर्मुक्तः सिद्धोभवतियोगिराट्॥
तत्स्वरूपंनचैतस्यविषयोमनसोगिरां॥२६॥ समाधौक्रियमाणेतुविघ्नान्यायांतिवैबलात्॥ अनुसं
धानराहित्यमालस्यंभोगलालसं॥२७॥ लयस्तमश्चविक्षेपोरसास्वादश्चशून्यता॥ एवंयद्विघ्नबाहु
ल्यंत्याज्यंब्रह्मविदाशनैः॥२८॥ भाववृत्त्याहिभावत्वंशून्यवृत्त्याहिशून्यता॥ ब्रह्मवृत्त्याहिपूर्णत्वंतथा
पूर्णत्वमभ्यसेत्॥२९॥

तस्यस्तब्धीभावः कषायः स्तुब्धतेत्यर्थः स्पष्टमन्यत्॥२८॥ वृत्तिरेवबंधमोक्षकारणमित्या
ह॥ भावेति॥ भाववृत्त्याघटाद्याकारवृत्त्याभावत्वंतन्मयत्वं॥ शून्यवृत्त्याअभाववृत्त्येत्यर्थः॥ शून्यताजडतेत्यर्थः॥ ही राम॰
तिलोकप्रसिद्धौ॥ तथाब्रह्माकारवृत्त्यापूर्णत्वंहीतिविद्वत्प्रसिद्धौ॥ ततः किमतआह॥ तद्येति॥ २९॥ २३

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्रब्रह्मवृत्तिंस्तोतुमितरांवृत्तिंनिंदति॥स्पष्टंतामेववृत्तिंस्तौति॥३०॥३१॥स्तुत्यत्वेहेतुमाह॥सुगमं॥३२॥ताने
वशब्दवादिनोनिंदति॥कुशलाइति॥यतएवंतस्मात्॥३३॥यथाब्रह्माद्यास्तथासनकाद्याः॥यथासनकाद्यास्त
थाशुकाद्याइतिसंप्रदायोदर्शितः॥एतेनब्रह्मादिसेव्यत्वादतिश्रेष्ठोयंसमाधिपर्यंतोराजयोगःसर्वदामुमुक्षुभिःसे

येहिवृत्तिंविहायैनांब्रह्माख्यांपावनींपरां॥तेतुवृथैवजीवंति पशुभिश्चसमानराः॥३०॥येहिवृत्तिंविजा
नंतिज्ञात्वापिवर्द्धयंतिये॥तेवैसत्पुरुषाधन्याःवंद्यास्तेभुवनत्रये॥३१॥येषांवृत्तिःसमावृद्धापरिपक्वा
चसापुनः॥तेवैसद्ब्रह्मतांप्राप्तानेतरेब्रह्मवादिनः॥३२॥कुशलाब्रह्मवार्त्तायांवृत्तिहीनाःसुरागिणः॥ते
प्यज्ञानतमानूनंपुनरायांतियांतिच॥३३॥निमिषार्द्धं नतिष्ठंतिवृत्तिंब्रह्ममयींविना॥यथातिष्ठंति ब्रह्मा
द्याःसनकाद्याःशुकादयः॥३४॥कार्येकारणतायाताकारणेनहिकार्यता॥ वनीयइतिध्वनितं॥३४॥तदेवंस्वा
भिमतंसांगंयोगमभिधायपूर्वोपक्रांतसांख्यापरपर्यायंवेदांतविचारमुपसंहरति॥कार्यइत्यादिभिःपंचभिःश्लोकैः॥
कार्येघटपटादिरूपेविकारेकारणतामृत्तत्वादिरूपासर्वविकाराधिष्ठानताआयाताऽवगता॥कारणेतुकार्यतानही
तिप्रसिद्धं॥ततःकारणात्कार्याभावेकारणत्वंनश्येत्॥ननुकथंकारणेकार्याभावइत्यतआह॥विचारतइति॥
१८६ ञ

For Private and Personal Use Only

यथायंदृष्टांतस्तथाकाशादिकारणतास्तिइत्यादिसत्तादिरूपव्यवहारहेतुः॥सत्यज्ञानादिरूपब्रह्मणःकारणता 
आयाताअनुगताब्रह्मणितुआकाशादिकार्यतानहीति॥अतःपरमार्थतःआकाशाद्यभावेब्रह्मणःकारणतापिन
हीतिदार्ष्टांतिकोर्थः॥३५॥ततःकिमतआह॥अथेति अथानंतरंकारणत्वनिवृत्तौयद्वेप्रसिद्धंशुद्धंमनोवा

कारणत्वंततोनश्येत्कार्याभावेविचारतः॥३५॥अथशुद्धंभवेद्वस्तुयद्वैवाचामगोचरं॥द्रष्टव्यं
मृद्घटेनैवदृष्टांतेनपुनःपुनः॥३६॥अनेनैवप्रकारेणवृत्तिर्ब्रह्मात्मिकाभवेत्॥उदेतिशुद्धचि
त्तानांवृत्तिज्ञानंततःपरं॥३७॥कारणंव्यतिरेकेणपुमानादौविलोकयेत्॥अन्वयेनपुनस्तद्धि
कार्येनित्यंप्रपश्यति॥३८॥कार्येहिकारणंपश्येत्पश्चात्कार्यंविसर्जयेत्॥कारणत्वंततोगच्छेद
वशिष्टंभवेन्मुनिः॥३९॥

वाचामगोचरंवस्तुतद्भवेत्॥ननुबुद्धेःक्षणिकत्वेनैकदाविचारितेपिपुनरन्यथैवप्र
भातीत्यतआह॥द्रष्टव्यमिति॥३६॥ नकेवलमयंविचारोज्ञानसाधनमेवापितुध्यानसाधनमपीत्याह॥अनेने
तिस्पष्टं॥३७॥तमेवविचारंविशदयतिद्वाभ्यांकारणमितिआदौप्रथमंकारणंव्यतिरेकेणकार्यविरहेणवि 
चारयेत्॥पुनस्तत्कारणमन्वयेनानुवृत्त्याकार्येतिनित्यंप्रपश्यतीति॥यद्वादौकार्येकारणमेवविचारयेत्॥ 

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पश्चात्तत्कार्यं विसर्जयेत्॥नात्रसंदध्यात्कार्यवर्जनेसतिकारणत्वंस्वतएवगच्छेत्॥एवंकार्यकारणवर्जनेऽ
वशिष्टंसच्चिन्मात्रंमुनिर्मननशीलःस्वयमेवभवेदिति॥३९॥ननुविचारजन्यापरोक्षज्ञानेनैवान्यथास्थितंव
स्तुयथास्थितंभवेत॥परंतुपरोक्षज्ञानमात्रेणकथंभवेदित्याशंक्यसदृष्टांतमाह॥भावितमिति अयंभावः॥
यद्यपिपरोक्षज्ञानेनप्रमातृगतावरणनिवृत्तावपिप्रमेयगतमावरणंननिवर्त्तते॥तथापिनिश्चयात्मनानिश्च
यबुध्यापुरुषेणयद्वस्तुतीव्रवेगेनाहर्निश्यावृत्त्याभावितंचिंतितं॥तद्वस्तुज्ञेयमपिशीघ्रंपुमान्ज्ञाताभवेत्॥इ

भावितंतीव्रवेगेनयद्वस्तुनिश्चयात्मना॥पुमांस्तद्धिभवेच्छीघ्रंज्ञेयंभ्रमरकीटवत्॥४०॥अदृश्यं
भावरूपंचसर्वमेवचिदात्मकं॥सावधानतयानित्यंस्वात्मानंचैवभावयेत्॥४१॥ तिसर्वलोकप्रसि
द्धो॥तमेवदृष्टांतमाह॥भ्रमरकीटवदिति॥भ्रमरेणानीतोजीवन्नेवस्वकुंड्यांप्रवेशितोयःकीटःसयथाभयात्
भ्रमरध्यानेनभ्रमरएवभवतितद्वदिति॥४०॥यतोभावनाबलात्अन्यदेवान्यद्भवेत्किंपुनस्तदेवतत्तस्मा
त्॥अदृश्यंदृष्टृरूपं॥भावरूपंदृश्यंचकारादृशनं॥एतत्सर्वंभिन्नस्वभावमपिचिदात्मकंनिर्विशेषस्फुरण ॥टि॥
मात्ररूपंभावयेदित्यर्थः॥चपुनः॥नमेवस्वात्मानंसावधानतयानित्यंभावयेदिति॥४१॥एतदेवविवृणोति॥दृश्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 दृश्यंघटपटादिकमदृश्यतामधिष्ठानचिद्रूपतांनीत्वाहीतिविद्वत्प्रसिद्धोब्रह्माद्याकारेणकल्पितपरिछिन्न 
नामादिनिवृत्तौब्रह्मदाकारेणापरिछिन्नरूपेणेत्यर्थः॥ चिंतयेत्॥ततःकिमतआह॥ चिद्रूसपूर्णयास्फुरत्सुख
पूर्णयाधिया नित्यसुखेविद्वांस्तिष्ठेदिति॥४२॥इदानीमुक्तंस्वाभिमतयोगमुपसंहरति॥ किंचित्स्वल्पंपक्वादग्धा
मलाःरागादयोयेषांहठयोगेनपातंजलोक्तेनप्रसिद्धेनाष्टांगयोगेनसंयुतोयंवेदांतोक्तोयोगइतिशेषःस्पष्ट

दृश्यंह्यदृश्यतांनीत्वाब्रह्माकारेणचिंतयेत्॥विद्वान्नित्यसुखेतिष्ठेद्धियाचिद्रसपूर्णया॥४२॥
एभिरंगैःसमायुक्तोराजयोगउदाहृतः॥किंचित्पक्वकषायाणांहठयोगेनसंयुतः॥४३॥परिपक्वं
मनोयेषांकेवलोयंचसिद्धिदः॥गुरुदैवतभक्तानांसर्वेषांसुलभोजवात्॥४४॥ ॥४३॥अयमेवकेषां

योग्यइत्याकांक्षायांसर्वग्रंथार्थमुपसंहरन्नाह॥ परिपक्वमिति॥ येषांमनःपरिपक्वंपक्वमलंरागादिरहितमि
तियावत्॥तेषामित्यध्याहारः॥तेषांजितारिषड्वर्गाणांपुरुषधुरंधराणांकेवलंपातंजलत्यभिमतयोगनिरपे
क्षः॥अयंवेदांताभिमतयोगःसिद्धिदः॥प्रत्यगभिन्नब्रह्मापरोक्षज्ञानद्वारास्वस्वरूपावस्थानलक्षणमुक्ति 
प्रदःचकारोवधारणे॥नान्येषामपरिपक्वमनसामित्यर्थः॥ननुपरिपक्वमनस्त्वतिदुर्लभं॥इत्याकांक्षायामस्या 

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पिसाधकत्वाद्तोप्यंतरंगंसाधनमाह॥गुरुदैवतभक्तानामिति॥जवादितिशीघ्रमित्यर्थः॥सर्वेषामितिपदे
नवर्णाश्रमादिनिरपेक्षंम नुष्यमात्रंगृहीतव्यं॥अतएवगुरुदैवतभक्तेरंतरंगत्वं॥तथाचश्रुतिः॥यस्य
देवेपराभक्तिर्यथादेवेतथागुरौ॥तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइति॥स्मृतिश्चतद्विद्धिप्रणिपा
तेन॥श्रद्धावान्लभतेज्ञानमित्याद्याः॥अयंभावः॥गुरुदैवतभक्तानांपरिपक्वमनस्त्वादतिदुःसाध्यान्यपिसाध
नानिसुसाध्यानिभवंतीतिहेतोर्गुरुदैवतभजनमेवस्वधर्माविरोधेनसर्वैःकार्यमितिपरमंमंगलं॥४४॥पूर्णय
मापरोक्षेणनित्यात्मज्ञानकाशिका॥अपरोक्षानुभूत्याख्याग्रंथराजप्रदीपिका॥१॥नमस्तस्मैभगवतेशंकरा
चार्यरूपिणे॥येनवेदांतविद्येयमुद्धृतावेदसागरात्॥२॥यद्यपिशंकरःसाक्षाद्वेदांतांभोजभास्करः॥नोदिष्येत्त
र्हिकाशेतकथंव्यासादिसूत्रितं॥३॥अत्रयत्संमतंकिंचित्तद्गुरोरेवमेनहि॥असंमतंतुयत्किंचित्तन्ममैवगुरोर्न
हि॥४॥यत्प्रसादादहंशब्दप्रत्ययालंबनंहियः॥अहंसजगदालंबःकार्यकारणवर्जितः॥५॥तस्यश्रीगुरुराज
स्यपदाब्जेतुसमर्पिता॥दीपिकामालिकासेयंतत्कृपागुणगुंफिता॥६॥योहंस्वाज्ञानमात्राज्जगदिदमभवंस्वादि
देहांतमादौस्वस्वप्नादिवदेवसोहमधुनास्वाज्ञानतःकेवलं॥ब्रह्मैवास्म्यद्वितीयंपरमसुखमयंनिर्विकारंविनाऽथजा
गृत्यादिवदेवदेवगुरुसत्त्वस्वप्रसादोत्थितात्॥७॥इतिश्रीविद्यारण्यविरचिताअपरोक्षानुभूतिदीपिकासमाप्ता

For Private and Personal Use Only

 अजरोहममरोहंप्राज्ञोहंप्रत्यगात्मबोधोहं॥ परमानंदमयोहंपरमशिवोहंभवामिपरिपूर्णः॥१॥ अथज्ञानिमहिमा 
संग्रहश्लोकेनलिख्यते॥ तीर्थेति॥ तीर्थेअथवाश्वपचगृहे चांडालवेश्मनिनष्टस्मृतेरपिस्मरणहीनोपिदेहंत्य
जन् ज्ञानसमकालमुक्तः ज्ञानेनएतत्समकालएवमुक्तः अपगतशोकः विशेषेणअवगतःसन्कैवल्यंमोक्षंयाति
प्राप्नोति॥४४॥ रथ्यांतरेति॥ रथ्यांतरेपण्यमार्गेमूत्रपुरीषमध्येमूत्रमलयुतभूमौ॥ चांडालवेश्मनिअंत्यजगृहेअ

तीर्थेथवाश्वपचगृहेवानष्टस्मृतिर्वापरित्यजन्देहं॥ ज्ञानफलकालसमयेकैवल्यंयातिविगतशोकः
॥४४॥ रथ्यांतरेमूत्रपुरीषमध्येचांडालवेश्मन्यथवाश्मशाने॥ कृतप्रयत्नोह्यकृतप्रयत्नोदेहावसा
नेलभतेचमोक्षं॥४५॥ अतिवादांस्तितिक्षेतनावमन्येतकिंचिन॥ नचैवदेहमाश्रित्यवैरंकुर्यात्केनचि
त॥४६॥ नकुर्यान्नवदेत्किंचिन्नध्यायेत्साध्वसाधुषु॥

थवाश्मशाने सुखंवर्ततेतत श्मशानंतत्रकृतप्रयत्नः
अकृतप्रयत्नः प्रयत्नहीनोपिदेहावसानेदेहस्यअवसानेअंतेमोक्षंलभतेप्राप्नोति॥४५॥ अतिवादेति॥ अतिवादान्
अतिक्रमान्तितिक्षेतसहेतुकिंचनकिमपिनअवमन्येतएनंदेहआश्रित्यकेनचित्वैरंनकुर्यात्॥४६॥ नकुर्येति॥ 
किंचितसाधुषुप्रियंअसाधुषुअप्रियंनकुर्यान्नवदेत्नध्यायेत्आत्मारामःसुखंयस्यसमुनिःअनयावृत्याज 

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अकिंचनइति॥अकिंचनस्यदरिद्रस्यदांतस्यशमादियुक्तस्यशांतस्यशांतियुक्तस्यसमंचेतोयस्यसः तस्यप्रि
याप्रियरहितमनसः मयागुरुणासंतुष्टमनसः दिशः सुखमयाः सुखरूपाकृतोपदेशादितिशेषः॥४८॥नि
र्वासनेति निर्वासनः निरालंबः आश्रयवर्जितः स्वछंदः स्वाधीनः मुक्तबंधनः॥मुक्तानिगुणानांबंध नानिय
स्यसः एतादृशोयोगीसंस्कारवातेनप्राग्जन्मकर्मलक्षणेनवायुनाक्षिप्तः आक्रांतश्चेत्तर्हिशुष्कपर्णवत्चेष्ट

आत्मारामोनयावृत्याविचरेज्जडवन्मुनिः॥४७॥अकिंचनस्यदांतस्यशांतस्यसमचेतसः॥ मयासंतु
ष्टमनसः सर्वासुखमयादिशः॥४८॥निर्वासनोनिरालंबः स्वछंदोमुक्तबंधनः॥क्षिप्तोसंस्कारवातेन
नचेष्टतेशुष्कपर्णवत्॥४९॥मोक्षस्यनहिवासोस्तिनग्रामांतरमेववा॥अज्ञानहृदयग्रंथिनाशो
मोक्षः सद्भिरुच्यते॥५०॥अहिमिवजनयोगंसर्वदावर्जयेद्यः कुणपमिवसुनारींत्यक्तकामोविरा

तेभ्रमति॥४९॥मोक्षेति॥मोक्षस्यवासः गृहंनअस्तिग्रामांतरमेवअन्यः ग्रामोपिनास्ति॥हृदयग्रंथिः अज्ञा
नंतन्नाशः अज्ञाननाशः मोक्षः सद्भिः उच्यते॥५०॥अहिमिवभुजंगमिवसर्वदाजनयोगंजनसंसर्गंकुण
पमिवशववत्नारींवनितांत्यक्तकामः त्यक्ताः कामाः अभिलाषाः येनसः विरागोविषयेषुनासक्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 दुरंतांदुःखंअंतःअवसानंयस्याः तांविषयासिंविषयव्याप्तिंविषमिवमन्यमानःजयतिसर्वोत्कृष्टत्वेनवर्त्तते 
यःसःपरमहंसःसर्वसन्यासिमुक्तिभावंमोक्षंसमेनिगच्छति॥ ५१॥ भारतेचरमाध्यायेव्यासोक्तिः॥ अजरम
मरमेकंध्येयमाद्यंतशून्यंसगुणमगुणमाद्यंस्थूलमत्यंतसूक्ष्मं॥ निरुपममनुमेयंयोगिनांज्ञानगम्यंत्रिभुव

विषमिवविषयाप्तिंमन्यमानोदुरंतांजयतिपरमहंसोमुक्तिभावंसमेति ॥ ५१ ॥ ॥

नगुरुमीशंत्वांप्रपन्नोस्मिविष्णो॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभगवत्पादशिष्यविरचितेश्री
विद्यारण्यकृतटीकाअपरोक्षानुभूतिदीपिकासमाप्ता ॥

इतिसटीकाअपरोक्षानुभूतिः समाप्ता ॥

वाराणसीप्रसादस्यनियोगेनप्रयत्नतः॥ काशीसंस्कृतमुद्रायामंकितोयंशिलाक्षरैः॥ १॥ श्रीकाशीजीमेमहल्ले
हौदकटोराश्रीयुतबाबूवाराणसीप्रसादजीकेमकानमे काशीसंस्कृतमुद्रायंत्रमेछपी जिनकोलेनाहो
यउनकोउक्तस्थानमे श्रीबाबूवाराणसीप्रसादजीकेपास याकचौरीगलीमे भाईप्रतापसिंहजीकेपास 
मिलेगी संबत् १९४१ ॥ ७ ॥ 

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतिसटीकाअपरोक्षानुभूतिः समाप्ता

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only